केन्द्रीयसंस्कृतविश्वविद्यालयः

नवशृङ्खला ११

श्रीरामप्राणप्रतिष्ठा संवत् २


# संस्कृतवार्ता

त्रैमासिकं वार्तापत्रम्


वर्षम् १५ वैक्रमाब्दः २०८२ पौषशुक्लद्वितीया - फाल्गुनशुक्लैकादशी जनवरी - मार्च २०२५




**सम्पादकौ**

**प्रो. अजयकुमारमिश्रः**

**डा. पवनव्यासः**

**सम्पादनसहयोगः**

**श्रीविनयकुमारशुक्लः**

**प्रकाशकः**

**कुलसचिवः**

*केन्द्रीयसंस्कृतविश्वविद्यालयः*

*(संसद अधिनियमेन स्थापितः )*

*५६-५७, इन्स्टीव्यूशनल एरिया, जनकपुरी*

*नवदेहली - ११००५८*

*०११-२८५२४९९३,२८५२१९९४,२८५२०९७७*

*Email : sanskritvarta@csu.co.in*




## कुलपतिसन्देशः

दीपाः स्थितं वस्तु विभावयन्ति कुलप्रदीपास्तु भवन्ति केचित्।
चिरं व्यतीतानपि पूर्वजान् ये प्रकाशयन्ति स्वगुणप्रकर्षात्॥ (सुभाषितम्)

स्वगुणप्रकर्षात् शिक्षा-स्वाध्याय-शोधपटुभिः शिष्यैः प्रवचन-प्रकाशनानुसन्धानदक्षैः प्राध्यापकैः च विश्वविद्यालयकुलस्य कृते कुलप्रदीपैः भाव्यम्। नूतनशिक्षासत्रारम्भावकाशे पुनरपि अस्माभिः विगतसत्रे सङ्कल्पितं गुणोत्कर्षं साधयितुं शक्त्या भक्त्या च प्रवचनादिसारस्वतकर्मसु प्रवर्तनीयम्। विकसितभारताय संस्कृतं साधकतमं भवतु इति भावेन राष्ट्रविकासस्य महल्लक्ष्यं मनसि निधाय एतस्मिन् सत्रे सर्वेऽपि प्राध्यापकाः अन्तेवासिनः कर्मयोगिनश्च स्वस्वकर्तव्यं परिपालयेयुः। साध्यसाधनविवेकेन परिसरेषु कार्यक्रमाः भवेयुः। तेजस्विनः शिष्याः समाजाय संस्कृताय राष्ट्राय किमपि महत्तरं दायित्वं स्वीकर्तुं तत्पराः भवेयुः। अस्माकं शैक्षिकपरिसराणां वातावरणं अध्ययनानुकलं भवेत्। पारम्परिकशास्त्राणां समाजोपयोगिपक्षाणां प्रायोगिकं स्वरूपम् अस्माकम् अध्ययनेन अध्यापनेन अनुसन्धानेन च सम्प्रकाशितं भवेत्। सर्वेभ्यः संस्कृतवार्तापाठकेभ्यः शिवाशयान् समर्पयति-

विद्वज्जनविधेयः
श्रीनिवासः वरखेडी
कुलपतिः



www.youtue.com/c/CentralSanskritUniversityDelhi


https://twitter.com/centralsanskrit


https://www.facebook.com/centralsanskrit


Website: www.sanskrit.nic.in/publication_and_programme.php





## अभिनव सङ्क्षेपग्रन्थाः























Scan to Purchase















# चरन्ति वसुधां कृत्स्नां वावदूका बहुश्रुताः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः जनवरीमासस्य तृतीयदिनाङ्के गुजरातराज्यस्य वलसाडमण्डले श्रीमुक्तानन्दसंस्कृतविद्यालयद्वारा आयोजिते षड्विंशे वार्षिकोत्सवे मुख्यातिथिरूपेण भागमगृह्णात्।







उत्सवेऽस्मिन् कुलपतिमहोदयेन स्वीयोद्बोधने उक्तं यत् मानसिकस्वास्थ्यलाभाय वैद्यालयेन सह संस्कृतस्यापि महन्महत्वं वर्तते। राक्षसवृत्तितः रक्षितुं साक्षरत्वम् एव न पर्याप्तम् अपितु सद्भावना, शान्तिः, भ्रातृप्रेम अपि अपेक्षते। अवसरेऽस्मिन् जयपुरपरिसरस्य निदेशकः प्रो. सुदेशशर्मवर्यः, महाविद्यालयस्य प्राचार्यः श्रीदिनेशचन्दगडकोटीवर्यः उपस्थितः आसीत्।



माननीयकुलपतिमहोदयः विश्वविद्यालयीयसदाशिवपरिसरस्य नवनिर्माणाधीनभवनस्य निरीक्षणं कृत्वा अभियन्तृजनैः सह नूतननिर्माण विषये वार्तालापं कृतवान् आवश्यकदिशा-निर्देशमपि दत्तवान्। अवसरेऽस्मिन् परिसरनिदेशकाः अन्ये च अधिकारिणः उपस्थिताः आसन्।



फेब्रुवरीमासस्य १४ दिनाङ्के देशभगतविश्वविद्यालयस्य १२तमे दीक्षान्तसमारोहे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः मानदोपाधिना सम्मानितः। एषः सन्मानः तेषां विविधशास्त्रे वैशारदीं, विशिष्टमवदानं चाभिलक्ष्य प्रदत्तः। सम्मानानन्तरम् आचार्येण उक्तं यदयं सन्मानः मम न अपितु सम्पूर्ण संस्कृतजगतः सन्मानः। सर्वेषां छात्राणाम् अभिनन्दनं कृत्वा तेन निगदितं यत् पञ्जाबराज्यस्य इतिहासः देशभक्त्या पाण्डित्यपरम्परया च परिपूर्णः अस्ति अतः वयम् आशास्महे यत् अस्य विश्वविद्यालयस्य छात्राः अपि अस्माकं राष्ट्रस्य विश्वस्य, मानवजातेः विकासाय च अवश्यं प्रयतिष्यन्ते।








आईसीएसएसआर मानितः दत्तोपन्तठेङ्गडीशोधसंस्थानम् द्वारा मार्चमासस्य १-३ दिनाङ्कयोः राष्ट्रीयशोधार्थी समागमः इति कार्यक्रमस्य आयोजनमभवत्। कार्यक्रमस्यास्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः शोभामवर्धयत्। अवसरेऽस्मिन् प्रो. वरखेडीवर्यः भारतीयशोधस्य अवधारणा इति विषये भाषमाणः उक्तं यत् संस्कृतवाङ्मये अनुसन्धानस्य महतीसमृद्धपरम्परा आसीत्।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयकुलपतिः राष्ट्रपतिभवने आयोजिते आगन्तृसम्मेलने उपस्थितः आसीत्। इयम् उपस्थितिः विश्वविद्यालयस्य गौरवं वर्धयाति इति।



वाराणस्यां सारनाथस्थ केन्द्रीय-उच्च-तिब्बती-शिक्षासंस्थाने आयोजिते षोडशदीक्षान्तसमारोहे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः वाक्पतिः इति मानदोपाधिना अलङ्कृतः। समारोहेऽस्मिन् प्रो. वरखेडीवर्येण उक्तं यत् एषः अलङ्कारः केवलं मम कृते न अपितु गुरुशिष्यपरम्परायाः अलङ्कारः अस्ति।



## ब्रेललिपिदिवसः

ब्रेलदिवसमुपलक्ष्य प्रो. श्रीनिवाससरखेडीवर्यः उक्तवान् यत् मनुष्याणां चित्ते मस्तिष्के च तादृशी एका शक्तिः भवति यस्याः प्रयोगेण मनुष्यः लुईब्रेलः, कालिदासः, पाणिनि सदृशः दिव्यात्मवत् कविः, लेखकः सन् मानवतायाः कृते स्वयोगदानं दातुं शक्नुवन्ति। शोधार्थिनां प्रेरयन्तः आचार्येण उक्तं यत् लुईब्रेलः इत्यस्मात् जीवनात् युवजनाः प्रेरणां स्वीकुर्युः यतोहि ब्रेलवदेव तेषामनुसन्धानमपि विश्वकल्याणाय भवेत्। अनया दृष्ट्या संस्कृतसाहित्ये बहव्यः शोधसम्भावनाः दृश्यन्ते।

**वाग्देवीमुपास्महे-** विद्यायाः अधिष्ठातृदेव्याः समाराधना फेब्रुवरीमासस्य ३ दिनाङ्के हर्षोल्लासेन केन्द्रीयसंस्कृतविश्वविद्यालये अभवत्। देव्याः पूजनार्चनानन्तरं कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः बसन्तोत्सवमुद्दिश्य उद्बोधितं यत् एषः महोत्सवः भारतीयसंस्कृतेः प्रमुखाङ्गम् अस्ति। एतादृशायोजनेन भारतीयसंस्कृतेः, आध्यात्मिक शक्तेः एवञ्च ज्ञानस्याऽपि उन्नयनं भवति।



## विश्वपुस्तकमेला

भारतीयराष्ट्रियपुस्तकसंस्थया (NBT) फेब्रुवरीमासस्य १ दिनाङ्कतः ९ दिनाङ्कपर्यन्तम् आयोजितायां नवदेहलीविश्वपुस्तकमेलायां (NDWBF) केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रकाशनविभागः प्रतिभागमकरोत्। माननीयकुलपतिः प्रो. श्रीनिवासवरखेडीवर्यः प्रसन्नतां प्राकटयन् उक्तवान् यत् विश्वविद्यालयस्य प्रकाशनविभागः जनसामान्यान् संस्कृतमधिगन्तुं सरलमानकसंस्कृत सम्बन्धीनि पुस्तकानि प्रकाशयितुं सार्थक प्रयत्नं विधाष्यति। अस्यां मेलायां न्यूनातिन्यूनमूल्येन संस्कृताध्येतॄणां कृते पुस्तकानि उपलब्धान्यासन् इति प्रकाशनविभागस्य निदेशकः प्रो. काशीनाथन्यौपनेवर्यः उक्तवान्। अस्यां विश्वपुस्तकनवराल्यां प्रकाशनविभागस्य संयुक्तनिदेशकः प्रो. सुज्ञानकुमारमाहान्तिवर्यः, प्रो. गणेश ति. पण्डितवर्यः, सहायकनिदेशिका डॉ. छोटीबाईमीणावर्या अन्ये च अधिकारिणः समये निरीक्षणं विधाय प्रकाशनगुणोत्कर्षं वर्धयितुं मार्गदर्शनं कृतवन्तः। विश्वविद्यालयस्य शोधच्छात्राः अवसरेऽस्मिन् लाभान्विताः अभूवन्।

## केन्द्रीयसंस्कृतविश्वविद्यालये आरम्भः भविष्यति चतुर्वर्षीय (४+१) शास्त्रिपाठ्यक्रमः।

केन्द्रीयसंस्कृतविश्वविद्यालये आगामि शिक्षणसत्रतः २०२५-२६ चतुर्वर्षीयशास्त्रि एवञ्च एकवर्षीय आचार्यपाठ्यक्रमस्य आरम्भः भविष्यति इति आचार्यः श्रीनिवासवरखेडीवर्यः हिमाचलस्थितस्य वेदव्यासपरिसरस्य निदेशिका प्रो. सत्यम् कुमारीवर्यां नवशिक्षानीतिः २०२० अन्तर्गतपाठ्यक्रमस्य विषये अवबोधयत्। श्रीवरखेडीवर्येण उक्तं यत् नवशिक्षानीतेः अन्तर्गत शास्त्रीस्नातकः,शास्त्रीशोधः, आचार्योपाधयः सत्रार्धप्रणाल्याः आधारेणैव दास्यन्ते। कुलपतेः कथनानुसारं सर्वासु सत्रार्धप्रणालीषु मुख्यविषयः १०० अङ्कानां कृते भविष्यति तेषु ६० अङ्कानां लिखितपरीक्षा एवं ४० अङ्कानां सततमूल्याङ्कनम् इति। दक्षताविकासे भाषाः, कौशलविकासे योगः, सङ्गणकम्, सङ्गीतम्, नाट्यम्, कर्मकाण्डम्, ज्योतिषम्, वास्तुशास्त्रमित्यादि विषयाः भविष्यन्ति। पाठ्यक्रमे सर्वेषां छात्राणां कृते प्रशिक्षुताकार्यक्रमः अनिवार्यः। कुलसचिवः प्रो. आर् जी मुरलीकृष्णवर्येण उक्तं यत् विश्वविद्यालयस्य विद्वत्परिषदा निर्णयः स्वीकृतः यत् केन्द्रीयसंस्कृत-



विश्वविद्यालयः आयुर्वेद-आदर्श-अनुसन्धानकेन्द्रस्य स्थापना करिष्यति। भारतीयज्ञानपरम्परां प्रोत्साहयितुं संस्कृत, गीता, IKS ओलम्पियाड् एवञ्च राष्ट्रीयसङ्गोष्ठीनां सञ्चालनं करिष्यति। श्रृंगेरी, देवप्रयागपरिसरे च गुरुकुलवातावरणनिर्माणार्थं वेदविद्यायाः अध्यापनं, विश्वविद्यालयस्य विविध परिसरे च नूतनशैक्षणिकपाठ्यक्रमाणां सञ्चालनं विधास्यति। शैक्षणिक-अधिष्ठाता प्रो. मदनमोहनझावर्यः उक्तवान् यत् विश्वविद्यालयस्य NEP पाठ्यक्रमनिर्धारणसमितेः प्रतिवेदनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य समस्तपरिसरेषु, आदर्शमहाविद्यालयेषु, सम्बद्धमहाविद्यालयेषु च प्रवर्तितम्।

**सङ्गोष्ठी-** भारतस्य प्रतिष्ठितानां त्रिवेणीसदृशसंस्कृतविश्वविद्यालयानां तिरुपतिस्थ राष्ट्रीयसंस्कृतविश्वविद्यालये द्विदिवसीया सङ्गोष्ठ्याः आयोजनम् अभवत्। अस्यां सङ्गोष्ठ्यां देहलीस्थित केन्द्रीयसंस्कृतविश्वविद्यालयः, लालबहादुरशास्त्रिराष्ट्रीयसंस्कृतविश्वविद्यालयः च भागमग्रहीतवन्तौ। त्रयाणां संस्कृतविश्वविद्यालयस्य कुलपतीनाम् आध्वर्यवे संस्कृतक्षेत्रे जायमाने विकासकार्यक्रमस्य चिन्तनमभवत्।



छात्राणां भव्यं भविष्यञ्च निर्माणार्थं तत्र केचन् निर्णयाः स्वीकृताः। यथा- शास्त्री-आचार्य पाठ्यक्रमेषु समानता, भारतीयज्ञान- परम्परायाः, विषये ऐक्यमतं सहयोगश्च क्रेडिट-सिस्टम-प्रणाली, छात्रवृत्तिदाने समानावसरः, संकायविनिमयकार्यक्रमः, कौशलविकासः, ऑनलाइन-पाठ्यक्रमाणां मान्यता इंटर्नशिप कार्यक्रमाणां सुव्यवस्थितं सञ्चालनं, संकायसदस्यानां कृते पाठ्यक्रम-प्रशिक्षण- कार्यक्रमाणाम् आयोजनम् इत्यादयः। विविध अकादमिक स्वीकृतानां विषयाणां हस्ताङ्कनमपि अस्यां सङ्गोष्ठ्यां अभवत्। अवसरेऽस्मिन् त्रयाणां विश्वविद्यालयानां अधिकारिणः उपस्थिताः आसन्। विश्वविद्यालयपक्षतः कुलसचिवः प्रो. रा.गा. मुरलीकृष्णवर्यः सर्वेभ्यः शुभकामनां दत्तवान्।

**भारतीयज्ञानपरम्परासम्बद्धकार्यशाला-** विश्वविद्यालययस्य मुख्यालये भारतीयज्ञानपरम्परासम्बद्धकार्यशालायाः आयोजनं २५ दिनाङ्कतः २७ दिनाङ्क पर्यन्तम् अभवत्। अवसरेऽस्मिन् कुलपतिमहोदयः उक्तवान् यत् भारतीयज्ञानप्रणालीमधिकृत्य केवलं संस्कृतज्ञाः परस्परं चर्चयन्ति चेत्तर्हि सा चर्चा सर्वदा लाभकरी न स्यात्। अस्माभिः समाजे आधुनिकविश्वविद्यालयेषु च तत्रत्यानाम् अपेक्षानुगुणं (भारतीयज्ञानपरम्पराम् अधिकृत्य) वक्तव्यम्। IIT IIM इत्याद्यासु उच्चशिक्षासंस्थासु भारतीयगणितीयप्रतिमानानि तदितराणि सुखबोधशैल्या उपस्थापनीयानि। संस्कृतज्ञानां वैदुष्यं केवलं संस्कृतज्ञानां निमित्तमिति न स्यात्। अधुना वयं भारतप्रत्ययुगे वर्तामहे। अतः संस्कृतस्य महत्त्वं संस्कृतस्य प्रासङ्गिकतां चाधिकृत्य नैव भाषणीयम्। सर्वे संस्कृतस्य महत्त्वं प्रासङ्गिकतां च विजानन्ति। कथं दशसु मासेषु संस्कृताध्ययनं सम्भवति? का पद्धतिः अवलम्बनीया? इत्याद्याः आधुनिकानां जिज्ञासाः। अतः तेषां पुरतः संस्कृतस्य महिमवर्णनं सुतरां नैव कर्तव्यम्। सर्वविज्ञातस्य आवृत्त्या चर्वितचर्वणमेव भवति। कार्यशालायां आभारते विद्यमानानां परिसराणां, विश्वविद्यालयानां प्राध्यापकाः भागं ग्रहीतवन्तः। समापनावसरे भारतीयज्ञानपरम्पराधारित ओलम्पियाड् इत्यस्य प्रचार-सामग्र्याः लोकार्पणमभवत्।



**शास्त्रपद्धतेः (कन्नडानुवादस्य) लोकार्पणम्-** शास्त्रदृष्टेः विकासाय शास्त्रमार्गस्थानां सुखबोधाय च माननीयकुलपतिना (अन्ताराष्ट्रियसंस्कृत-राजदूतेन) श्रीनिवासवरखेडीवर्येण सरलशैल्या संस्कृतेन च शास्त्रपद्धतिः इति ग्रन्थः लिखितः। ततस्ततः प्रादेशिकभाषाभिमानिनां सुखबोधाय संस्कृतलोकप्रियस्य अस्य ग्रन्थस्य हिन्दीभाषायां मराठीभाषायां कन्नडभाषायां च तद्भाषापण्डिताः अनुवादकार्यमकुर्वन्। कन्नडानुवादः यद्यपि जातः एव तथापि अनूदितग्रन्थस्यास्य औपचारिकलोकार्पणं कर्णाटकराजधान्यां सारस्वतसन्निधौ च सद्यः सुसम्पन्नम्। कन्नडभाषालेखनकर्मणि सिद्धहस्तः युवविद्वान् डा. विश्वनाथसुंकसाळमहोदयः (श्रीभारतीतीर्थपरिसरप्राध्यापकः) कन्नडानुवादं कृत्वा कन्नडिगानां सुखबोधाय भृशम् उपाकरोत् इति विज्ञाय सर्वे सभ्याः सन्तुष्टाः अभवन्। सभासदः अनुवादकं शुभाशयैरभ्यनन्दन् । ग्रन्थस्य लोकार्पणं ११/०३/२०२५ एस व्यास विश्वविद्यालयस्य कुलपतिचरेण आचार्येण कोटेमने-रामचन्द्रभट्टर्येण विहितम्। कर्णाटकसंस्कृतविश्वविद्यालयस्य कुलपतिचरैः प्रो. मलेपुरं वेङ्कटेशवर्यैः ग्रन्थस्य परिचयः सभामुखं सम्पादितः। सभायाः आध्यक्ष्यं कर्णाटकविश्वविद्यालयस्य कुलपतिवर्यया डा. अहल्याशर्ममहोदयया निर्व्यूढम्। प्रो. शिवानीवर्या, पुस्तकस्य प्रकाशकसंस्थायाः शैलजावर्या चात्र उपस्थिताः। अधुना उत्कलभाषायां नेपालीभाषायां अन्यास्वपि भाषासु शास्त्रपद्धतेः अनुवादः जायमानः वर्तते इति विशेषः। मूलग्रन्थकारः वरखेडीवर्यः चलद्विश्वविद्यालयोपमः (Walking University) इत्यतः यत्र यत्र सः याति तत्र सर्वत्र संस्कृतसुगन्धोपेतसमीरोऽपि वाति। सन्दर्भेऽस्मिन् मूलग्रन्थकत्रे अनुवादकाय मञ्चस्थेभ्यः सर्वेभ्यः ज्येष्ठेभ्यः सभ्येभ्यश्च विद्वद्भ्यः धन्यवादान् व्याहरामः।




**अखिलभारतीयशास्त्रोत्सवः-** केन्द्रीयसंस्कृतविश्वविद्यालयेन हरिद्वारस्थपतञ्जलिविश्वविश्वविद्यालये समायोजितस्य द्विषष्टितम-अखिलभारतीय शास्त्रीयप्रतियोगिताकार्यक्रमस्य शुभारम्भः १८/०३/२०२५ दीपप्रज्वलनपुरस्सरं समभूत्। शास्त्रोत्सवनाम्ना आचर्यमाणे अस्मिन् कार्यक्रमे सर्वादौ वाक्यार्थ-सभा समायोजिता। जनिकर्तुः प्रकृतिः इति विषयम् अवलम्ब्य आदौ विद्वद्भिः वाक्यार्थः कृतः। कुलपतीनां वरखेडीवर्याणां भव्योपस्थितौ आयोजितायाः वाक्यार्थसभायाः आध्यक्ष्यम् आचार्यदेवदत्तपाटीलवर्यैः निरूढम्। आचार्य-व्रजभूषण-ओझावर्यः (पदशास्त्रमाश्रित्य) आचार्यज्ञानेन्द्रसापकोटावर्यः (प्रमाणशास्त्रम् आश्रित्य) आचार्यतुलसीकुमारजोशीवर्यः (वाक्यशास्त्रमाश्रित्य) आचार्यकुप्पाबिल्वेशशर्मवर्यश्च (अद्वैत-वेदान्तशास्त्रमाश्रित्य) क्रमशः वाक्यार्थमकुर्वन्। शास्त्रोत्सवस्य औपचारिकोद्घाटन कार्यक्रमे त्रयः कुलपतयः विशेषरूपेण उपस्थिताः आसन्। उद्घाटनसत्रस्य अध्यक्षः के.सं.वि.वि. कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः अवदत् यत् अयोध्या मथुरा माया... इत्याद्याः सप्त पुर्यः स्मर्यन्ते पूज्यन्ते च। सप्तसु





मायापुरी (हरिद्वारम्) अन्यतमा। आधुनिके युगे हरिद्वाराभिधाने अस्मिन् स्थाने योगायुर्वेदयोः आचार्याभ्यां योगायुर्वेदयोः संवर्धनं विधीयते इति दर्शं दर्शं विश्वस्य सर्वेऽपि सन्तुष्टाः सन्ति। अधुना हरिद्वारं सारस्वत-कार्यस्यापि अभिप्रेरणास्थानम्। अतः अत्र शास्त्रोत्सवः सर्वेषाम् इष्टाय कल्पत एवेति। अद्यत्वे मया लोपद्वयं विद्याकेन्द्रेषु सर्वत्र विलोक्यते। एषः लोपः अस्माभिः यत्नेन यथाशीघ्रं च दूरीकर्तव्य एव। जिज्ञासायाः लोपः तपसः लोपः इति लोपद्वयं विद्यामार्गे सदैव (यूनां युवतीनां च) बाधकमेव। विना जिज्ञासां तपः विना (परिश्रमेण) किं वा साधयितुं शक्नोति छात्रः? अतः लोपस्य दूरीकरणं विधेयम् एवेति। विशिष्टातिथिषु अन्यतमः महर्षि-पाणिनिवैदिकविश्वविद्यालयस्य कुलपतिः आचार्यविजयकुमारः सी.जी. वर्यः अभाषत। दशकद्वयात् प्राक् केवलं संस्कृताध्ययनकेन्द्रेषु विभागेषु सम्बद्धप्रकोष्ठेषु च भारतीयज्ञानपरम्परायाः विषये चर्चा भवति स्म। अधुना स्वर्णयुगे देशस्य कोणे कोणे सर्वेषु स्थानेषु केन्द्रेषु च भारतीयज्ञान परम्परायाः निनादः श्रूयते। अतः अस्मिन् युगे वर्तमानाः वयमेव धन्याः इति। जयपराजययोः चिन्तां त्यक्त्वा स्पर्धासु भागं गृह्णन्तु इति सङ्गीत-नाटक-अकादमी इत्यस्य अध्यक्षा डा. सन्ध्या पुरेछा महोदया अवदत्- प्रज्ञानमेव (Wisdom) अस्माकं लक्ष्यं स्यात् इत्यपि। तदग्रे अखिलभारतीयशिक्षासमितेः अध्यक्षः प्रो. एन्.पी.सिंहवर्यः अवदत् यत् पाश्चात्यदार्शनिकः विलियमजेम्स डुरांटवर्योऽपि सकलभाषाणां जननी संस्कृतभाषा अस्ति इति कथयति। अस्माभिः यदि भारतीयज्ञानपरम्परायाः मूलतत्त्वानि ज्ञातव्यानि तर्हि संस्कृतवाङ्मयस्य अध्ययनं सर्वेणापि भारतीयेन करणीयम् एव। कृत्रिमबुद्धेः सदुपयोगाय स्पष्टप्रतिपत्तये (coding and decoding) चापि संस्कृतभाषा अनिवार्या अस्ति इति। तदग्रे पतञ्जलिविश्वविद्यालयस्य कुलपतिः आचार्यः बालकृष्णवर्यः अवदत् यत् यदि भारते शास्त्रं न स्यात् तर्हि संस्कृतिरपि न स्यात्। शास्त्रम् सर्वशक्तिमत्। केन्द्रीयसंस्कृतविश्वविद्यालयेन योगपीठे शास्त्रोत्सवः आयोज्यते इति ममापि हर्षस्य विषयः वर्तते इति। स्वामिनारायणगुरुकुलपक्षतः स्वर्णशलाकाः यथापूर्वं समर्पिताः। स्वर्णशलाकायाः प्रायोजक-स्थानीयमिदं गुरुकुलम् आबहोः कालात् कार्यरतं वर्तते। स्वागतवचनानि कार्यक्रमसंयोजकेन प्रो. मधुकेश्वरभट्टवर्येण वितीर्णानि। सञ्चालनं धन्यवाद-समर्पणं च डा. पवनव्यासवर्येण सम्पादितम्। द्विसहस्राधिकाः गुरुकुलच्छात्राः विश्वविद्यालयस्य छात्राः स्पर्धालवः च उद्घाटनावसरे साक्षिणः अभवन् । शास्त्रोत्सवे वीरसंन्यासी इव पूज्याः स्वामिरामदेववर्याः अभाषन्त। गुरुकुलच्छात्राः अद्य विश्वनायकाः सर्वपूज्याः

भवितुमर्हन्ति इत्यत्र अहमेव प्रत्यक्षम् उदाहरणम् अस्मि । मया अष्टाध्यायी अधीता। तद्बलेन दिनद्वये शेयर मार्केट् विषये परिज्ञानं प्राप्तम्। राजनीतिः विज्ञाता। समाजस्य सर्वाणि अङ्गानि क्षेत्राणि च विज्ञातानि। भारतीयः एकोऽपि संस्कृतज्ञः निरुद्योगी न स्यात् इत्येव अस्माकं प्रयासः सङ्कल्पः च वर्तते इत्यवदन्। सर्वे भवन्तु धनिनः इति समन्दहासं वदन्तः मञ्चस्थान् सर्वान् वरिष्ठान् निर्णायकान् च स्वामिनः कुलपतिप्रमुखाः च धनवस्त्रफलपुस्तक- मालादिभिः सत्कृतवन्तः। उत्सवेऽस्मिन् त्रिषष्टिसङ्ख्यकाः निर्णायकाः सत्कृताः। समापनसत्रे उत्तराखण्डराज्यस्य माननीयः मुख्यमन्त्रिणः श्रीपुष्करसिंहधामीवर्यः, भारतसर्वकारस्य पूर्वशिक्षामन्त्रिणः डा. रमेशपोखरियालः निशङ्कवर्यः च समुपस्थाय स्वशास्त्रे कृतभूरिपरिश्रमाणां छात्राणां मार्गदर्शनं कृतवन्तौ। अवसरेऽस्मिन् माननीयः मुख्यमन्त्रिमहोदयः उक्तं यत् उत्तराखण्डराज्यः देशस्य प्रथमः राज्यः यत्र संस्कृतं द्वितीयराज्यभाषात्वेन सुशोभिता अस्ति। शीघ्रमेव संस्कृत ग्राम योजना अपि सर्वकारसहयोगेन प्रारब्धा भविष्यति। एतदर्थं वयं बद्धपरिकराः स्मः। डा. रमेशपोखरियालवर्यः उक्तवान् यत् देशे प्रथम वारं संस्कृतविश्वविद्यालयत्रयस्य कृते केन्द्रीयम् इति स्थानं दत्तं वर्तते। उत्तराखण्डराज्यः यस्मै देवभूमिरिति कथ्यते स च संस्कृताय समर्पितः राज्यः वर्तते। कार्यक्रमेऽस्मिन् स्वामिरामदेववर्यः "भारतीयविद्यावैभवसार्वभौमः" इत्युपाधिना विभूषितः। शास्त्रोत्सवे ३४ स्पर्धाः सञ्चालिताः तत्र प्रथम-द्वितीय-तृतीय-सान्त्वना पुरस्कारान् प्रप्तवद्भ्यः छात्रेभ्यः माननीय-मुख्यमन्त्रिणः श्री पुष्करसिंह धामीवर्यैः क्रमशः स्वर्ण-रजत-कांस्य पदकं प्रमाणपत्रं धनराशि प्रदान पुरस्सरं सत्कृतः। संस्कृत ओलम्पियाड् परीक्षायां प्रथम-द्वितीय-तृतीय श्रेण्यामुत्तीर्णतां प्राप्तवद्भ्यः सर्वेभ्यः उत्सवेऽस्मिन् पुरस्काराः प्रदत्ताः। प्रकाशनविभागपक्षतः नवागतग्रन्थानां विमोचनम् अभवत्। अन्ते पतञ्जलिविश्वविद्यालयस्य प्रतिभाशालिभिः छात्रैः योगवैभवम् नृत्यवैभवं च सुष्ठु प्रदर्शितम्। युवतीनां कलावैभवं दर्शं दर्शं सर्वे प्रेक्षकाः अमन्दमानन्दमन्वभवन्।


















ग्रन्थालयाधारिता राष्ट्रिया सङ्गोष्ठी- केन्द्रीयसंस्कृतविश्वविद्यालयः, इन्दिरागान्धीराष्ट्रीयकलाकेन्द्रम् उभयोः संयुक्ततत्त्वावधाने मार्चमासस्य २६ दिनाङ्कतः २८ दिनाङ्क पर्यन्तम् राष्ट्रीयशिक्षानीतिः २०२० तथा विकसितभारते संस्कृतपुस्तकालयानां भूमिका इति विषयमधारीकृत्य राष्ट्रीयासङ्गोष्ठी आयोजिता। अस्याः उद्घाटनम् दीपप्रज्वालनेन माननीय कुलपतिः के.सं.वि.वि, निदेशकः IGNCA अन्ये च आहूताः अतिथयः कृतवन्तः। सङ्गोष्ठ्याः विषये प्रो. श्रीनिवासवरखेडीवर्यः उक्तवान् यत् आधुनिक प्रौद्योगिक्याः काले संस्कृतस्य ज्ञानसम्पत् पाठकानां शोधकर्तानाञ्च कृते न्यूनातिन्यूनमूल्यैः उपलब्धं कारयितुं संस्कृतं संस्कृतसहयोगिपुस्तकानां संयोजनं च स्वचालित साफ्टवेयर द्वारा भवतु इति समयाकाङ्क्षा। परन्तु अत्र नैकाः समस्याः अपि सन्ति ताः समस्याः कथम् अपगच्छेयुः इति उद्देश्यं स्वीकृत्य सङ्गोष्ठ्याम् अस्याम् भारतस्य नैके विद्वांसः एकस्यां सभायाम् उपविश्य स्व विचारान् उपस्थास्यन्ति। भाविनि काले संस्कृतजगत्यपि परिवर्तनं भविष्यति इति मे विश्वासः सर्वेभ्यः शुभकामनाः च। डा. पूरणमलगुप्तावर्यः उक्तवान् (पुस्तकालयाध्यक्षः), यत् देशस्य विख्याताः विद्वांसः अत्र मार्गदर्शनं करिष्यन्ति। उद्घाटनसत्रस्य मुख्यातिथयः डा. सुकान्तमजूमदारवर्यः माननीयः राज्यशिक्षामन्त्रिणः भारतसर्वकारः कार्यक्रमेऽस्मिन् उपस्थाय कथितं यत् संस्कृतं तादृशी प्राणदायिनीशक्तिरस्ति या प्रत्येकऽस्मिन् युगे परिलक्ष्यति। उद्घाटनसत्रस्य अध्यक्षता डा. सच्चिदानन्दजोशिवर्यैः कृतम्। अवसरेऽस्मिन् प्रो. रमेश सी गौडः निदेशकः IGNCA, श्रीशङ्करानन्दः बी.आर् भारतीयशिक्षामण्डलम्, प्रो. शान्तिश्री-धूलीपुडीवर्या, कुलपतिः JNU विशिष्टातिथिः, प्रो. मुरलीमनोहरपाठकवर्यः कुलपतिः LBSNSU, प्रो.रा.गा. मुरलीकृष्णवर्यः कुलसचिवः के.सं.वि.वि, प्रो. मदनमोहनझावर्यः शैक्षणिक अधिष्ठाता, प्रो.काशीनाथन्यौपानेवर्यः निदेशकः प्रकाशनविभागः अन्ये च अधिकारिणः, विद्वांसः, शोधच्छात्राः, कर्मचारिणश्च उपस्थिताः आसन्।





## शास्त्रपरम्परोत्कर्षं युवानः कर्तुमुद्यताः





स्वामीविवेकानन्दः जयन्त्युपलक्ष्ये केन्द्रीयसंस्कृतविश्ववद्यालये युवदिवसः समाचरितः। दिवसेऽस्मिन् जनवरीमासस्य ११-१३ दिनाङ्कं यावत् कुलपतिमहोदयानां भारतीयज्ञानपम्परायाः संवर्धने बहुचर्चिता, विविधभाषानुवादिता च (हिन्दी,कन्नड़, मराठी) शास्त्रपद्धतिः इति पुस्तकमभिलक्ष्य त्रिदिवसीया राष्ट्रियसङ्गोठ्याः प्रत्यक्षेण आभासेन चोभयमाध्यमेन आयोजनमभवत्।

अस्यां सङ्गोष्ठ्याम् आभारतात् आचार्याः, शोधच्छात्राः,सामाजिकाश्च सम्पृक्ताः आसन्। नवोन्मेषे कार्यक्रमे युवानः युवत्यः व्याख्यानं दत्तवन्तः। अनया सङ्गोष्ठ्या भारतीयज्ञानपरम्परायाः दृष्टेः शोधसम्भावनानाञ्च विकासः भविष्यति इति अस्याः सङ्गोष्ठ्याः संयोजकः प्रो.गणेश ति.पण्डितवर्यः उक्तवान्।




अवसरेऽस्मिन् कुलसचिवः प्रो. रा.गा.मुरळीकृष्णवर्यः, प्रो. काशीनाथन्यौपानेवर्यः, प्रो.मधुकेश्वरभट्टवर्यः, डा. पवनव्यासवर्यः अन्ये च अधिकारिणः, शोधच्छात्राः, कर्मचारिणश्च उपस्थिताः आसन्।

**तदर्थं वेदिका ह्येषा कल्पिता शास्त्रवर्धिनी**

## राष्ट्रिया अनुवादकार्यशाला

जनवरीमासस्य २३-२५तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य सारस्वतसभागारे प्रो. श्रीनिवासवरखेडीवर्यस्य आध्यक्ष्ये विश्वविद्यालयानुदानायोगः, भारतीयभाषासमितिः, श्रीलालबहादुरशास्त्रिराष्ट्रीयसंस्कृतविश्वविद्यालयस्य च संयुक्त तत्वाधाने भारतीयभाषाणां पाठ्यसामग्रयः संस्कृतभाषायां लेखनार्थं द्विदिवसीया राष्ट्रियकार्यशालायाः आयोजनमभूत। कार्यशालायां शिक्षाविद् प्रो. चान्दकिरणसलूजावर्यः, विशिष्टातिथिः प्रो. मुरलीमनोहरपाठकवर्यः, सम्मानितातिथिः डॉ. श्रीनिवासुमन्थावर्यः, डॉ. के. गिरिधररावववर्यः, अन्ये च व्याख्यातारः, पदाधिकारिणः, विविधसंस्कृतविश्वविद्यालयस्य भागग्राहिणः च उपस्थिताः आसन्।







# विद्वत्-परिषद्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य विद्वत्परिषदः उपवेशनम् फेब्रुवरीमासस्य २७ दिनाङ्के कुलपतिः प्रो. श्रीनिवासवरखेडीवर्यस्य आध्यक्षे अभवत्। उपवेशनेऽस्मिन् विद्वत्परिषदा शैक्षणिकविकासे नवशिक्षानीतिसम्बद्धाः महत्त्वपूर्णनिर्णयाः स्वीकृताः। यथा- विविध-परिसरेषु नूतनपाठ्यक्रमाणां प्रारम्भः, शिक्षकशिक्षापाठ्यक्रमस्य प्रारम्भः, नवशिक्षानीत्या-धारितपाठ्यक्रमस्य ४+१ आरम्भः, शृंङ्गेरी, देवप्रयागपरिसरेषु वैदिकशिक्षायाः (कृष्णयजुर्वेदः, शुक्लयजुर्वेदः) प्रारम्भः इत्यादि। अवसरेऽस्मिन् कुलसचिवः प्रो. रा.गा. मुरलीकृष्णवर्यः, शैक्षणिक अधिष्ठाता प्रो. मदनमोहनझावर्यः अन्ये चाधिकारिणः प्रत्यक्षपरोक्षरूपेण उपस्थिताः आसन्।



# विद्या मित्रं प्रवासेषु

माननीयः कुलपतिमहोदयस्य आचार्यस्य श्रीनिवासवरखेडीवर्यस्य मार्गदर्शने थाईलैण्डदेशे संस्कृतोच्चशिक्षायाः अन्ताराष्ट्रियकरणस्य अवसराणाम् अन्वेषणार्थं विश्वविद्यालयस्य प्रतिनिधिमण्डलेन शैक्षणिकयात्रा आचरिता। अस्यां यात्रायां दिल्लीविश्वविद्यालस्य आचार्यः अमरजीवलोचनवर्यः, बौद्धदर्शनपालीविभागस्य आचार्यचरः प्रो. रामनन्दनसिंहः, प्रो. जी.सी.एस. नेगीवर्यः, डॉ. प्रफुल्लगडपालः, डॉ. नितिनकुमारजैनः चास्य मण्डलस्य सदस्याः आसन्।



सर्वप्रथमं बैंकॉक इत्यस्य रॉयल-बौद्धमहाचुलालोङ्गकोर्नराजविश्वविद्यालयस्य, अनन्तरं सलायास्थरॉयलमहामकुटबौद्धविश्वविद्यालयस्य, बैङ्गकॉकस्थितस्य शिल्पकोर्न-विश्वविद्यालयस्य संस्कृताध्ययनकेन्द्रस्य च फरवरीमासस्य १९ तमे दिनाङ्के समागमो विहितः। फेब्रुवरीमासस्य २१तमे दिनाङ्के चिआङ्गमाई-नगरे रॉयल-बौद्धमहाचुलालोङ्गकोर्न-राजविश्वविद्यालयस्य, रॉयलमहामकुटबौद्धविश्वविद्यालयस्य च परिसरद्वये विद्वदधिकारिसमागमः आसीत्।

एवं शिष्टमण्डलेन थाइलैण्डदेशस्य पञ्चसंस्थासु संस्कृतभाषाशिक्षणस्य प्रचारप्रसारार्थम् अयं कार्यक्रमः आयोजितः। विशिष्य भारत-थाईलैण्डदेशयोर्मध्ये सुदृढसम्बन्धस्य विकासाय शैक्षणिकसहकार्यसम्बद्धेषु विषयेषु चिन्तासु च प्रतिनिधिमण्डलेन विविध- विषयाः यथा- स्नातक-स्नातकोत्तरस्तरयोः संयुक्त-उपाधिकार्यक्रमसम्भावनाः, मुक्तस्वाध्यायपीठस्य विविधकार्यक्रमाः, थाईलैण्डदेशे संस्कृत-पाली-प्राकृत-प्रवर्धन सम्बद्धाः प्रकल्पाः चर्चिताः। आगामिकाले केन्द्रीयसंस्कृतविश्वविद्यालयेन साकं विभिन्नसंस्थानां एम.ओ.यू इत्यस्य सम्भावनाः अपि प्रकटिताः। विश्वविद्यालयस्य प्रो. अजयकुमारमिश्रवर्यः, डा. चक्रधरमेहरवर्यः एवञ्च विभिन्नपरिसरीयाः आचार्याः अपि एतेन दलेन सह थाइलैण्डदेशस्थ बैंकाकनगरस्य धौनबुरीराजभटविश्वविद्यालयस्य अन्ताराष्ट्रियसम्मेलने प्रदत्तविषयमुद्दिश्य शोधपत्रं प्रस्तुतवन्तः।



## भोपालपरिसरः

**राष्ट्रिया पञ्चाङ्गसंशोधनकार्यशाला-** भोपालपरिसरे श्रीभोजराजपञ्चाङ्गम् संशोधयितुम् ०६ दिनाङ्कतः १० दिनाङ्कपर्यन्तं राष्ट्रिया पञ्चाङ्ग-संशोधनकार्यशाला समायोजिता। अस्याः कार्यशालायाः उद्घाटनं ०६ तमे दिनाङ्के अभूत्। कार्यक्रमेऽस्मिन् भारतस्य विभिन्नेभ्यः कोणेभ्यः समागताः दैवज्ञाः समुपस्थिताः आसन्। भोपालपरिसरेण प्रकाश्यमानमिदं पञ्चाङ्गम् सरलसंस्कृतभाषया साकं लोकोपयोगि भवेदिति कार्यशालायाः मुख्यमुद्देश्यमासीत्। अवसरेऽस्मिन् आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठस्य (IQAC) निदेशकः पञ्चाङ्ग- सम्पादकश्च प्रो. ईश्वरभट्टमहोदयः, राजीवगांधीपरिसरस्य निदेशकः प्रो. हंसधरझावर्यः, श्रीरघुनाथकीर्तिपरिसरस्य निदेशकः प्रो. पी.वी.वि.सुब्रह्मण्यवर्यः समागताः आसन्। श्रीभोजराजपञ्चाङ्गस्य मुख्यसम्पादकः केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः श्रीनिवासवरखेड़ीवर्यः वर्तते। सभाध्यक्षः प्रो. रमाकान्तपाण्डेयवर्यः समुपस्थाय अवोचत् यत् इदानीं श्रीरामप्राणप्रतिष्ठासंवत्सरस्य सर्वत्र कीर्तिः प्रवहमना वर्तते। अस्याः कार्यशालायाः समन्वयकः संयोजकश्च प्रो. भारतभूषणमिश्रवर्यः आसीत्। अवसरेऽस्मिन् ज्यौतिषशास्त्रविद्याशाखायाः प्राध्यापकाः डॉ. रजनी, डॉ.अनिलकुमारः, डॉ. भूपेन्द्रपाण्डेयः, डॉ. रवीन्द्र उनियालः, डॉ. आशीषचौधरी, डॉ. आशुतोषतिवारी पञ्चाङ्गपरियोजनायाः प्राध्यापकाः डॉ. रोहितपचौरी प्रभृतयः कार्यशालायां पञ्चाङ्गसंसोधनकर्मणि साहाय्यम् अकुर्वन्।





**अधिराज्यीयशास्त्रीयस्पर्धाः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे २२-२३ इति दिनाङ्कयोः अधिराज्यीयशास्त्रीय-स्पर्धाकार्यक्रमः समायोजितः। अस्य कार्यक्रमस्य उद्घाटनसत्रे मुख्यातिथिः बरकतउल्लाहविश्वविद्यालयस्य कुलपतिः प्रो. सुरेशकुमारजैनवर्यः आसीत्। सारस्वतातिथिः विक्रमजीतसनातनसंस्कृतमहाविद्यालयस्य संस्कृतविभागस्य आचार्या शोभा- मिश्रावर्या आसीत्। तथैव अस्य शास्त्रोत्सवस्य समापनसमारोहे मुख्यातिथित्वेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत- विश्वविद्यालयस्य आचार्यः विष्णुपदमहापात्रवर्यः आसीत्। विशिष्टातिथित्वेन शासकीयरामानन्दसंस्कृतमहाविद्यालयस्य आचार्यः हरिप्रसाददीक्षितवर्यः आसीत्। सारस्वतातिथित्वेन हरीसिंहगौरविश्वविद्यालयस्य संस्कृतविभागस्य सहाचार्या डॉ.किरण-आर्या समुपस्थिता आसीत्। शास्त्रमहोत्सवेऽस्मिन् सभाध्यक्षः परिसरनिदेशकः प्रो. रमाकान्तपाण्डेयवर्यः आसीत्। तथा चावसरेऽस्मिन् परिसरस्य सहनिदेशकः प्रो. नीलाभतिवारीवर्यः समुपस्थितः आसीत्। शास्त्रमहोत्सवेऽस्मिन् मध्यप्रदेशस्य पतञ्जलिसंस्कृतसंस्थानेन सम्बद्धानां गुरुकुलानां छात्राः, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य छात्राः भोपालपरिसरस्य च छात्राः आहत्य प्रायः द्विशतसंख्यकाः स्पर्धालवः विभिन्नासु स्पर्धासु भागम् अगृह्णन्। शास्त्रसंरक्षणमस्माकं मुख्यं लक्ष्यम् इति हेतोः इमाः स्पर्धाः समनुष्ठिताः भवन्ति। अधिराज्यस्तरीयस्पर्धायां ये प्रथमं स्थानं प्राप्नुवन्, ते स्पर्धालवः अखिलभारतीयशास्त्रीयस्पर्धायां मार्चमासस्य १८-२१ दिनाङ्के भागं ग्रहीष्यन्ति। अस्य कार्यक्रमस्य संयोजकः प्रो.प्रदीपकुमारपाण्डेयः आसीत्। उद्घाटनसत्रस्य सञ्चालनं व्याकरणविद्याशाखायाः सहायकाचार्या डॉ. रागिनीशर्मा अकरोत्। समापनसत्रस्य सञ्चालनं जैनदर्शनविभागे सहायकाचार्यः डॉ. प्रतापशास्त्री कृतवान्। राष्ट्रगानेन सह कार्यक्रमः सम्पन्नताम् अगच्छत्।

**अन्ताराष्ट्रिय-महिलादिवसः -** केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे मार्च मासस्य दशमे दिनाङ्के अन्ताराष्ट्रियमहिलादिवसः समायोजितः। अवसरेऽस्मिन् मुख्यातिथिः प्रो. सन्ध्यात्रिवेदीवर्या, प्राध्यापिका रसायनविज्ञानम्, उच्चशिक्षा-उत्कृष्टतासंस्थानम्, भोपालम् समुपस्थाय परिसरच्छात्राभ्यः सम्बोधितवती। सभाध्यक्षः प्रो. रमाकान्तपाण्डेयवर्यः आसीत्। अवसरेऽस्मिन् सहनिदेशकः प्रो. नीलाभतिवारीवर्यः, समस्तपरिसरप्राध्यापकाः, छात्राः कर्मचारिणश्च समुपस्थिताः आसन्। एतस्मिन् अवसरे परिसरच्छात्राभिः दलद्वयं विनिर्माय क्रिकेट-क्रीडायाः प्रदर्शनमपि कृतम्।



**नाट्यशास्त्रानुसन्धानकेन्द्रस्य काशीहिन्दूविश्वविद्यालये विशेषप्रस्तुतिः -** केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरस्य नाट्यशास्त्राध्ययनानुसन्धानकेन्द्रस्य छात्रदलः काशीहिन्दूविश्वविद्यालये नाट्योत्पत्तिः इति नाट्यशास्त्राधारितं रूपकं २१/०३/२०२५ दिनाङ्के प्रादर्शयन्। जनसमुदायः नाट्योत्पत्तिमवलोक्य नितरां प्रसन्नः। अस्य कार्यक्रमस्य संयोजकौ डॉ. प्रसादरमेशभिड़े एवं डॉ. संगीतागुन्देचा आस्ताम् इति। नाट्यशास्त्रमादाय इतोऽपि अनुसन्धानस्य आवश्यकता वर्तते।

**काष्ठपुत्तलिकानिर्माणकार्यशाला,काष्ठपुत्तलिकाप्रदर्शनञ्च-** भोपालपरिसरेण १६-१७ दिनाङ्कयोः बी.ए.बी.एड्. (माध्यमिकः) ITEP इति कक्षायाः छात्राणां कृते काष्ठपुत्तलिका-निर्माणकार्यशाला विशिष्टव्याख्यानञ्च समायोजितम्। विशिष्टव्याख्यानस्य विषयः सम्प्रति भारतीय-सांस्कृतिकपुनर्जागरणम् इति आसीत्। विषयेऽस्मिन् परिसरच्छात्रान् उद्बोधयितुं मध्यप्रदेशनिर्वाचनायोगस्य आयुक्तः IAS श्रीमनोज-श्रीवास्तववर्यः अवोचत् यदस्माकं कृते भारतीयसनातनज्ञानपरम्परा महत्त्वपूर्णा वर्तते। रामायणं महाभारतञ्च स्वीकृत्य अपि अवदत् यत् अनयोः ग्रन्थरत्नयोः प्रतिपादितसिद्धान्ताः अस्माकं जीवने समाहिताः भवेयुः। काष्ठपुत्तलिकानिर्माणार्थं प्रशिक्षणं दातुं हैदराबादतः श्रीमान् रमेशरावलवर्यः श्रीमान् आदित्यराजझालावर्यः इति द्वौ प्रशिक्षकौ आगच्छताम्। छात्राः अत्र सोत्साहं प्रशिक्षणं प्राप्य २३तमे दिनाङ्के परिसरस्य भवभूतिप्रेक्षागारे काष्ठपुत्तलिकाप्रदर्शनम् अकुर्वन्। छात्राः विभिन्नसांस्कृतिक-पारम्परिकजीवनशैलीं, भारतीयज्ञानपरम्परां, छात्रानुशासनम्, पर्यावरणसंरक्षणम्, विद्यायाः महत्त्वम् इतोऽप्यन्यान् महत्त्वपूर्णविषयान् आदाय स्वयं काष्ठपुत्तलिकां निर्माय च प्रादर्शयन्। अवसरेऽस्मिन् परिसरस्य वरिष्ठप्राध्यापकः प्रो. सुबोधशर्मवर्यः परिसरस्य सहनिदेशकः प्रो. नीलाभतिवारीवर्यः एवम् अन्येऽपि विद्याशाखाप्राध्यापकाश्च समुपस्थिताः आसन्।

**महाकुम्भयात्रा-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतीनां आचार्यः श्रीनिवासवरखेडीवर्याणां सत्प्रेरणया मार्गदर्शनेन च भोपालपरिसरस्य पञ्चचत्वारिंशत् छात्राः मार्गदर्शकाश्च महाकुम्भयात्रार्थम् २२तमे दिनाङ्के भोपालपरिसरतः प्रयागराजं प्रति प्रस्थानं कृतवन्तः। अवसरेऽस्मिन् भोपालपरिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः, सहनिदेशकः प्रो. नीलाभ-तिवारीवर्यः च महाकुम्भयात्रादलस्य मार्गदर्शनम् अकुर्वन्। महाकुम्भ माहात्म्यमपि असूचयन्। प्रयागराजस्थमहाकुम्भे परिसरच्छात्राः सोत्साहं भागं स्वीकृत्य केन्द्रीयसंस्कृत-विश्वविद्यालयस्य ध्वजम् उत्तोलितवन्तः। प्रयागराजे संस्कृतमयवातारणं विधाय तत्रैव लघुसंस्कृतनाटिकामपि प्रादर्शयन्। पुनः समूहोऽयं २५/०१/२०२५ तमे दिनाङ्के भोपालं प्राप्नोत्।





**द्विदिवसीया राष्ट्रियसङ्गोष्ठी-** भोपालपरिसरे मार्चमासस्य २८-२९ दिनाङ्कयोः द्विदिवसीया राष्ट्रियसङ्गोष्ठ्याः आयोजनम् अभवत्। कार्यक्रमेऽस्मिन् मुख्यातिथिः राष्ट्रपतिसम्मानेन सम्मानितः प्रो. रहसबिहारीद्विवेदीवर्यः, विशिष्टातिथिः इन्दिरागांधीराष्ट्रियमुक्त विश्वविद्यालयस्य शिक्षाविभागस्य आचार्यः अरविन्दझावर्यः आसीत्। भोपालपरिसस्य सहनिदेशकस्य प्रो. नीलाभतिवारीवर्यस्य उपस्थितिः आसीत्। आध्यक्ष्यं परिसरनिदेशकस्य प्रो. रमाकान्तपाण्डेयवर्यस्य आसीत्। अस्य कार्यक्रमस्य सञ्चालनं डॉ. जितेन्द्रतिवारी अकरोत्। अत्रैव भारतीयज्ञानपरम्पराम् इति विषयमादाय प्रो. चांदकिरणसलूजामहोदयानां विशिष्टव्याख्यानम् अभवत्। अत्र आभासीयमाध्यमेन एवं प्रत्यक्षं समुपस्थाय ७० जनाः शोधपत्रं प्रास्तुवन्। अस्य कार्यक्रमस्य संयोजकः प्रो. सोमनाथसाहुवर्यः आसीत्।

**राष्ट्रियसेवायोजनाकार्यक्रमः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरेण राष्ट्रिय-सेवायोजनायाः सप्तदिवसात्मकं शिविरम् भोपालमण्डलान्तर्गतम् इमलिया इत्याख्ये ग्रामे आयोजितम्। शिक्षाशास्त्री प्रथमवर्षस्य १०८ छात्राः सम्मिलिताः। अस्य कार्यक्रमस्य अधिकारी शिक्षाशास्त्रविद्याशाखायाः सहायकाचार्यः डॉ.राकेशकुमारवर्मा आसीत्। कार्यक्रमान्तर्गतं वीथीनाटकानि, स्वच्छताभियानम्, संस्कृतसूक्ति- लेखनादयः समाचरिताः, ग्रामनागरिकाश्च जागरिताः। अस्य कार्यक्रमस्य मुख्यः मार्गदर्शकः परिसरस्य सहनिदेशकः प्रो. नीलाभतिवारीवर्यः आसीत्।



## ॥ विनोदजननं काले नाट्यमेतद् भविष्यति ॥

**यतो हस्तस्ततो दृष्टिः यतो दृष्टिस्ततो मनः।**
**यतो मनस्ततो भावो यतो भावो ततो रसः॥**




नवदेहलीस्थ-केन्द्रीयसंस्कृतविश्वविद्यालयेन मध्यप्रदेशशासनस्य संस्कृतिविभागस्य सहयोगेन तृतीयः अखिलभारतीयरूपकमहोत्सवः २०२४-२५ मध्यप्रदेशे कलासंस्कृतिराजधान्यां भोपाल-नगरे रवीन्द्रभवने अञ्जनीसभागारे माघशुक्लचतुर्दशीमङ्गलवासरतः फाल्गुनकृष्णद्वितीया-शुक्रवासरं यावत् समनुष्ठितः। रूपकमहोत्सवस्य उद्घाटनसत्रस्य मुख्यातिथिः साहित्य-अकादमी, दिल्ली इत्यस्य सचिवः डॉ. के. श्रीनिवासराववर्यः, कार्यक्रमस्य सम्मानितातिथिः कोलकातास्थितस्य चिदाकाशकलालयस्य संस्थापकः प्रमुखश्च श्रीपियालभट्टाचार्यमहोदयः, सारस्वतातिथिः संस्कृतरङ्गम्, चेन्नैतः श्रीमती नन्दिनीरमणीमहोदया, उद्घाटनसत्रस्य अध्यक्षः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य माननीयः कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः, आतिथेयः भोपालपरिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः, संयोजकः प्रो. नीलाभतिवारीवर्यः आसीत्। महोत्सवेऽस्मिन् कार्यक्रमनिदेशकः प्रो. मधुकेश्वरभट्टवर्यः उद्घाटनसत्रे समुपस्थितेभ्यः अतिथिभ्यः कार्तज्ञम् अदात्।




अवसरेऽस्मिन् प्रो. श्रीवरखेडीवर्यः अवोचत् यत् इदानीं महाकुम्भ इव अत्रापि संस्कृतरूपकाणां महाकुम्भ एव आयोज्यमानः वर्तते, भवद्भिः सर्वैरपि अत्रावगानम् अवश्यमेव करणीयमिति।









मन्त्रदानम् , नेतृलीलायितम्, यूथिका, मशकधानी, धर्मचक्रप्रवर्तनम्, सुशीला, महिमय-भारतम्, आश्चर्यकरमेव, विषमपरिणयम्, विकसतु एषा कलिका, वासन्तिकस्वप्नम्, शम्बूकाभिषेकम्, भासोऽहासः, कौण्डिन्यप्रहसनम्, पल्लीकमलम्, भाणकम्, देवशुनी, भगवदज्जुकीयम्, पणः, ओडिसी इति नृत्यम् एताः पञ्चदश प्रस्तुतयः आसन्।



रूपकमहाकुम्भेऽस्मिन् एकविंशतिः प्रस्तुतीनां प्रदर्शनम् अभवत्। उद्घाटनसत्रे एव पूर्वरङ्गः रङ्गदैवतपूजनं नाट्योत्पत्तिकथा च भोपालपरिसरस्य नाट्यशास्त्राध्ययनानु-सन्धानकेन्द्रेण प्रस्तुता।



रूपकमहोत्सवस्य समापनसत्रं फरवरीमासस्य चतुर्दशे दिनाङ्के अपराह्ने चतुर्वादने आरब्धम्। समापनसत्रेऽस्मिन् मुख्यातिथिः पद्मश्रीविजेता ब्रह्मर्षि मुदगुलनागफणीशर्मावर्यः, विशिष्टातिथिः कुटियाट्टमनेपथ्यकेन्द्रस्य निदेशकः डॉ मार्गिमधुवर्यः, सम्मानितातिथिः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलसचिवः प्रो. आर.जी. मुरलीकृष्णवर्यः, सारस्वतातिथिः दिल्लीविश्वविद्यालयस्य संस्कृतविभागस्य प्राध्यापिका डॉ. मीराद्विवेदीवर्या, मालकेश्वरस्थितस्य एम.एल.ए.विद्यालयस्य प्राचार्यः श्रीगणपति हेगड़ेवर्यः, कार्यक्रमस्य अध्यक्षः भोपालपरिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः आसीत्। समापनसत्रे विजेतृणां प्रतिभागिनां कृते मञ्चस्थैः अतिथिभिः पुरस्कारः प्रदत्तः क्रमशः सम्पूर्णाभिनीतेषु रूपकेषु प्रथमं स्थानं भोपालपरिसरेणाभिनीतं पल्लीकमलम् इति रूपकं प्राप्नोत्। सम्पूर्णाभिनीतेषु रूपकेषु सर्वोत्तमा अभिनेत्री इति पुरस्कारं सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयस्य छात्रा सुश्रीवन्दना विषमपरिणयम् इति रूपकम् अभिनीय प्राप्तवती। सर्वोत्तमः अभिनेता इति पुरस्कारं कालियाचकबिक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य छात्रः श्री अमरकण्टमलः आश्चर्यकरमेव इति रूपकम् अभिनीय प्राप्नोत्। श्री अनिरुद्ध एस.काकत्करः श्रीराजीवगांधीपरिसरस्य छात्रः वासन्तिकस्वप्नम् इति रूपकम् अभिनीय सर्वोत्तमपोषकनटः इति पुरस्कारं प्राप्नोत्। सुश्री आनन्दी-अग्रवालः लखनऊपरिसरस्य छात्रा नेतृलीलायितम् इति रूपकम् अभिनीय सर्वोत्तमपोषकनटी इति पुरस्कारं प्राप्नोत्।

# सर्वे गुणाः काञ्चनमाश्रयन्ते




श्रीसाहिलः वेदव्यासपरिसरस्य छात्रः यूथिका इति रूपकम् अभिनीय सर्वोत्तमहास्यनटः इति पुरस्कारं प्राप्नोत्। सुश्री-अञ्जलि भोपालपरिसरस्य छात्रा पल्लीकमलम् इति रूपकम् अभिनीय सर्वोत्तमहास्यनटी इति पुरस्कारं प्राप्नोत्। श्रीरणवीर-परिसरः भासोऽहासः इति रूपकम् अभिनीय सर्वोत्तमाहार्य-व्यवस्था इति पुरस्कारं प्राप्नोत्। श्रीसदाशिवपरिसरः कौण्डिन्यप्रहसनम् इति रूपकम् अभिनीय सर्वोत्तमरङ्गमञ्च-व्यवस्था इति पुरस्कारं प्राप्नोत्। वेदव्यासपरिसरः यूथिका इति रूपकम् अभिनीय सर्वोत्तमसङ्गीतसंयोजनम् इति पुरस्कारं प्राप्नोत्। एकलव्यपरिसरः शम्बूकाभिषेकम् इति रूपकम् अभिनीय सर्वोत्तमप्रकाशव्यवस्था इति पुरस्कारं प्राप्नोत्। कालीकट्-आदर्शसंस्कृतविद्यापीठः धर्मचक्रप्रवर्तनम् इति रूपकम् अभिनीय सर्वोत्तमपात्रसमन्वयपुरस्कारं प्राप्नोत्। भोपालपरिसरः पल्लीकमलम् इति रूपकम् अभिनीय सर्वोत्तमनिर्देशनम् इति पुरस्कारं प्राप्नोत्। सम्पूर्णाभिनीतेषु रूपकेषु गुरुवायूरपरिसरः सुशीला इति रूपकम् अभिनीय तृतीयं पुरस्कारं प्राप्नोत् तथा च कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः विकसतु एषा कलिका इति रूपकम् अभिनीय तृतीयं पुरस्कारं प्राप्नोत्। श्रीराजीवगांधीपरिसरः वासन्तिकस्वप्नम् इति रूपकम् अभिनीय द्वितीयं पुरस्कारं प्राप्नोत्। भोपालपरिसरः पल्लीकमलम् इति रूपकम् अभिनीय प्रथमं पुरस्कारं प्राप्नोत्। अवसरेऽस्मिन् आभारतात् नाट्यरसिकमर्मज्ञाः चिन्तकाः समालोचकाः समीक्षकाः भोपालनगरवासिनः रूपके भागग्राहिणः छात्राः परिसरस्य प्राध्यापकाः कर्मचारिणः मीडिया-बान्धवाश्च समुपस्थिताः आसन्।







**छात्रावास-परिस्पन्दः-** भोपालपरिसरे मार्चस्य २२-२३ दिनाङ्कयोः परिस्पन्दः इति कार्यक्रमः परिसरच्छात्राः एव सम्यक् सञ्चालितवन्तः। अत्र शैक्षणिक-सांस्कृतिकार्यक्रमाः अभूवन्। विजेतृछात्रेभ्यः सह-निदेशकः प्रो. नीलाभ-तिवारीवर्यः पुरस्कारं प्रायच्छन्।



**नवसंवत्सरमहोत्सवः** - केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे आचार्यः श्रीनिवासवरखेडीवर्याणाम् आध्यक्ष्ये आभासीयमाध्यमेन नवसंवत्सरमहोत्सवः भोपालपरिसरे ३० दिनाङ्के समनुष्ठितः। अवसरेऽस्मिन् आभारतात् दैवज्ञाः समुपस्थाय नवसंवत्सरसन्दर्भे चर्चाम् अकुर्वन्। अत्र मुख्यातिथित्वेन तिरुपतिस्थ-राष्ट्रियसंस्कृतविश्वविद्यालयस्य अध्यक्षचरः प्रो. श्रीपादभट्टवर्यः समुपस्थितः। सारस्वतातिथित्वेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य निदेशकः प्रो. सर्वनारायणझावर्यः समुपस्थितः। विशिष्टातिथित्वेन कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य आचार्यः प्रो. कृष्णकुमारभार्गववर्यः समुपस्थितः। अत्र आतिथेयः भोपालपरिसरस्य निदेशकस्य प्रो. रमाकान्तपाण्डेयवर्यस्य आसीत्। नवसंवत्सरमुद्दिश्य भोपालपरिसरीय प्राध्यापकाः छात्राश्च प्रातः पञ्चवादने शंखवादनं विधाय मूलरामायणपारायणं तथा च श्रीदुर्गासप्तशत्याः अपि पाठं सम्पादितवन्तः।

## लखनऊपरिसरः

**राज्यस्तरीयस्पर्धा-** जनवरीमासस्य ४-५ दिनाङ्कयो: प्रतिवर्षमिवैषम: केन्द्रीयसंस्कृतविश्वविद्यालये लखनऊपरिसरे राज्यस्तरीयस्पर्धा: समायोज्यन्त। अत्र व्याकरणादिषु द्वादशसु शास्त्रेषु भाषणस्पर्धा: एवं शलाकापरीक्षा, कण्ठपाठ:, शास्त्रार्थविचार:, समस्यापूर्ति:, अक्षरश्लोकी, शास्त्रीस्फूर्तिस्पर्धा आहत्य ३० स्पर्धा: समजायन्त। उत्तरप्रदेशस्य विभिन्नेभ्य: कोणेभ्य: समागतानां प्रतिभागिनां शास्त्रीयं गाम्भीर्यं धरणाशक्तिं च वीक्ष्य निर्णायकाः अन्ये सभासदस्ययाश्च चकिताः अभूवन्। निर्णायकत्वेन समागतः प्रो. शैलेशकुमारतिवारीवर्यः, डा. नीरजकुमारभार्गववर्यश्चासन्। प्रो. भारतभूषणत्रिपाठिवर्यस्य संयोजकत्वे प्रवृत्तस्यास्य कार्यक्रमस्य समापनसत्रं परिसरनिदेशकः प्रो. सर्वनारायणझावर्यस्य आध्यक्ष्ये विदुषां छात्राणां चोपस्थितौ समभवत्।





**क्षेत्रीयरूपकमहोत्सवः -** के.सं.वि.वि. भोपालपरिसरे क्षेत्रीयरूपकमहोत्सवस्य चतुर्थोवलय: ९-१० दिनाङ्कयो: समनुष्ठित:। तत्र लखनऊपरिसर: नेतृलीलायितं नामकं नाटकं प्रस्तौत् द्वितीयस्थानञ्च प्राप्नोत्। लखनऊपरिसरेण सर्वश्रेष्ठ-आहार्यव्यवस्था पुरस्कार:, सर्वश्रेष्ठ मञ्चव्यवस्थापुरस्कारश्च लब्ध:। आयुषमिश्रेण सर्वश्रेष्ठाभिनेतृपुरस्कार:, हरिओममणित्रिपाठिना च सर्वश्रेष्ठस्याभिनेतृ पुरस्कार: लब्ध:। षोडश जनानां समूहात्मकस्यास्य दलस्य नेतृत्वं संयोजकत्वं व्याकरणविद्याशाखाया आचार्यः प्रो.धनीन्द्रकुमारझावर्यः निर्वहणं कृतवान्। सहसंयोजने च डॉ. रुद्रनारायणनरसिंहमिश्र:, डॉ. शिवानन्दमिश्रश्चास्ताम्। श्रीमत्या उपासनात्रिपाठिन्या च मार्गदर्शकरूपेण योगदानं प्रस्तुतम्। अवसरेस्मिन् परिसरनिदेशक: अन्ये च धन्यवादमाविरकार्षु:।

**कुम्भयात्रा-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य अध्यापका: छात्राश्च आहत्य ४७ जना: १९/०१/२०२५ तमे दिनाङ्के प्रात: सप्तवादने कुम्भनगरीप्रयागाय प्रातिष्ठन्त। भरद्वाजोद्याने के. सं.वि.विद्यालयीयछात्रसङ्गमस्थले सर्वैरेकीभूय कुम्भमहत्त्वं निर्देशांश्च निर्देशकः प्रो. ललितकुमार-त्रिपाठिवर्यमुखाच्छ्रुतम्। यथारुचि यथासमयं च गणशो विभज्य सर्वेपि छात्रा: महाकुम्भस्थलम् अभ्रमिषु:। अग्रहीषुश्च पुण्यलाभेन सह ज्ञानम्। २० दिनाङ्के च प्रत्यागतं सर्वै:।





**गणतन्त्रदिवससमारोहः -** केन्द्रीयसंस्कृतविश्वविद्यालये लखनऊपरिसरे गणतन्त्रदिवसमुपलक्ष्य परिसर-निदेशकः प्रो. मदनमोहनपाठकवर्यः ध्वजारोहणम् अकरोत्, अवसरेस्मिन् परिसरस्य समेऽपि प्राध्यापका: छात्रा: कर्मचारिणश्च समुपस्थिताः आसन्। सः स्वीयनोद्बोधनेन सर्वानुत्साहयुतान अकार्षीत्। तदनु विश्वविद्यालयस्य कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यस्य भाषणम् ऑनलाइनमाध्यमेन सर्वै: श्रुतम्। तेन अधिकारशब्द: कर्तव्यबोधक: इत्यादि विषय: महत्यारभट्या वर्णित:। तेन च सर्वे श्रोतारो लाभान्विताः अभूवन्।

**राष्ट्रीयासङ्गोष्ठी-** लखनऊपरिसरे ३१ दिनाङ्के सिद्धचिकित्सापद्धतौ शास्त्रीयतमिलसाहित्ये राष्ट्रियसांस्कृतिकैकतायां च ऋष्यगस्त्यस्य भूमिका इतीमं विषयं समाश्रित्यैकाहिकीं सङ्गोष्ठीं पर्यकल्पयत्। यशस्विनां कुलपतिधुर्यं समुद्वहतां प्रो. श्रीनिवासवरखेडीवर्याणां संरक्षणे प्रवर्तमानां सङ्गोष्ठीमिमां मुख्यवक्तृत्वेन माननीयः मद्रपुरीसंस्कृतमहाविद्यालयस्य प्राचार्यः डॉ.एस अरुणसुन्दरवर्यः पर्यभूषयत्। प्राबोधयत् च अगस्त्यऋषिमाश्रित्य भूयसो विषयान्। तेन व्याख्यातं यत् केन्द्रसर्वकारः काशीतमिलसङ्गमं काश्यामककार्षीत् तत्रापि प्रायः ईदृशाः एव विषयाः अवर्तन्त। अगस्त्यऋषिः कालशास्त्रदेशभाषातन्त्रसम्प्रदायैः अपरिच्छिन्नः विद्यते। अत एव आवैदिककालात् सः अद्यावधि प्रथते। बहूनां मन्त्राणां द्रष्टृत्वेन वेदेषु, बह्वीनां कथानां पात्रत्वेन पुराणेषु, उत्तरदक्षिणदेशयोः सेतुरिव कथानकेषु, व्याकरणनिर्मातृत्वेन द्रविडापरपर्यारतमिलभाषायां, प्रवर्तकत्वेन च तन्त्रसम्प्रदायक्षेत्राणां कनिष्ठिकाधिष्ठिततां भजते। कविकुलगुरुः कालिदासः दक्षिणां दिशं वर्णयन् अगस्त्याचरितामाशाम् इत्यादिनामुं सश्रद्धं सस्मार। समुद्रपानम्, आतापिवातापिभक्षणम्, विन्ध्यनिरोधः, रावणवधार्थं श्रीरामाय दिव्यास्त्रप्रदानम्, वैद्यशिल्पादिशास्त्रप्रबोधनम्, संवादव्याजेन ललितासहस्रनामा-विष्करणं प्रभृतिभिरनेकैर्हेतुभिः तदीयं मुनित्वम् ऋषित्वम् सिद्धपुरुषादित्वं च स्फुटमेव। इत्यादिप्रकारेण अगस्त्यस्य प्रभावं न्यक्षेण सः निरूपयत्।

**मातृभाषादिवसः-** २५/०२/२०२५ दिनाङ्के राष्ट्रियुवदिवसमुपलक्ष्य मातृभाषादिवसं चोपलक्ष्य श्रीमतः परिसरनिदेशकस्य प्रो. सर्वनारायणझावर्यस्य आध्यक्ष्ये कार्यक्रमद्वयं समनुष्ठितम्। आधुनिकपरिप्रेक्ष्ये स्वामिविवेकानन्दस्य विचाराणामौचित्यम् इति विषये मातृभाषाविषये च छात्राणां प्रतियोगिताः अपि समपद्यन्त।



**लघुपाराशरीराष्ट्रियकार्यशाला-** लखनऊपरिसरस्य ज्योतिषविद्याशाखया फरवरीमासस्य २४ दिनाङ्कादारभ्य साप्ताहिकी कार्यशाला समारब्धा। ज्योतिषशास्त्रे लघुपाराशरीग्रन्थस्य महत्तामुपयोगितां चालक्ष्य ज्योतिषविद्याशाखायाः संयोजकः डा. हरिनारायणधरद्विवेदीवर्यः कार्यशालामेनां प्राकल्पयत्। लखनऊपरिसरस्य निदेशकस्य प्रो. सर्वनारायणझावर्यस्य आध्यक्ष्ये प्रो. भारतभूषणत्रिपाठिवर्यस्य विशिष्टातिथित्वे च समुद्घाटनसमारोहः संवृत्तः। उद्घाटनं कुर्वन् परिसर निदेशकः प्रतिभागिनां कृते सन्देशः प्रदत्तः यत् कमपि विषयं सम्पूर्णतया प्रपठ्य एव फलादेशः कर्तव्यः। अल्पज्ञानेन फलादेशे कृते शास्त्रस्य अप्रतिष्ठा समाजस्य च हानिः भवितुम् अर्हति। तत्र स्वागतवचनं, डा. हरिनारायणधरद्विवेदिना धन्यवादज्ञापनं, डा. उमेशपाण्डेयवर्येण संचालनं च डा. अनिरुद्धनारायणशुक्लेन निर्व्यूढम्। कार्याशालायां शताधिकाः प्रतिभागिनः भागं गृहीतवन्तः।

**लीलावतीकार्यशाला-** ०१/०३/२०२५ तः ०७/०३/२०२५ दिनाङ्कं यावत् केन्द्रीयसंस्कृतविश्वविद्यालये लखनऊपरिसरे लीलावतीकार्यशालायाः अनुष्ठानं प्रो. सर्वनारायणझावर्यस्य आध्यक्ष्ये समजनि। आध्यक्ष्यं कुर्वन् आचार्यः प्राचीन-भारतीय-अंकगणितस्य माहात्म्यम् अद्यतनपरिप्रेक्ष्ये तस्य प्रासंगितां च वर्णितवान्। कार्यशालायां उत्तरप्रदेश-बिहार-ओडिशा-त्रिपुरा-कर्णाटक-महाराष्ट्र-शिमलाप्रदेश-मध्यप्रदेशतः प्रतिभागिनः भागं गृहीतवन्तः। सदसि तस्मिन् ज्योतिश्शास्त्रविद्भौरेयः प्रो. मदनमोहनपाठकवर्यः विशिष्टं व्याख्यानं प्रायच्छत्। ज्योतिषशास्त्रीयं सामाजिकं माहात्म्यं च प्राचीकशत्। अनया कार्यशालया ज्योतिषशास्त्रजिज्ञासूनां सर्वेषामपि गणितानुरागिणां वैशिष्ट्येन छात्राणां महान् उपकारः जातः।

**व्याख्यानमाला-** लखनऊपरिसरे परिसरनिदेशकस्य प्रो. सर्वनारायणझावर्यस्य निर्देशने व्याख्यानमाला प्राकल्प्यत। तत्र प्रो. देवीप्रसादत्रिपाठी, प्रो. के. भरतभूषणः, प्रो. के. भागीरथिनन्दः, प्रो. ओमप्रकाशपाण्डेयश्च यथाक्रमं भारतीयं वास्तुशास्त्रम्, शिक्षाशास्त्रम्, संस्कृतानुवादपरम्परा तदनुगुणप्रक्रिया च, ब्राह्मणग्रन्थानुशीलनम् इतीमान् विषयान् समाश्रित्य ऊर्जस्वलानि व्याख्यानानि विधाय समेषामपि छात्राणां ज्ञानं प्रायच्छन्। भारतीयज्ञानपरम्परायां वास्तुशास्त्रम्, शिक्षाशास्त्रम्, संस्कृतानुवादपरम्परा तदनुगुणप्रक्रिया च, ब्राह्मणग्रन्थानुशीलनम् एषां विषयाणां प्रभूतं महत्त्वं जेगीयते अतो व्याख्यानमालेयं नितान्तमुपकरिष्णू सर्वेषाम्।



**वार्षिकोत्सवः** - २२-२३ दिनाङ्कयोः लखनऊपरिसरे महता समारम्भेण वार्षिकोत्सवः छात्रावासदिवसश्च छात्रैः छात्राभिश्च नृत्यगानादिमाध्यमेन सांस्कृतिकी प्रस्तुतिः व्यधायि समुदपादि च सहृदयचेतस्स्वमन्दा-नन्दसन्दोहः। डॉ. रुद्रनारायणनरसिंहमिश्रः शिवानन्द मिश्रयोः निर्देशने छात्रैः नेतृलीलायितनामधेयस्य नाटकस्य मनोहरा प्रस्तुतिरपि कृता। यां बहवो दर्शकाः आनलाइन/आफलाइनमाध्यमेन अद्राक्षिषुः। एवं प्रश्नमञ्च प्रतियोगिता, शास्त्रार्थः, गायनमित्यादयो कार्यक्रमाश्च समपद्यन्त।

**अन्ताराष्ट्रीयमहिलादिवसः-** अन्ताराष्ट्रीयमहिलासशक्तीकरणदिवससमारोहः परिसरनिदेशकस्य प्रो. सर्वनारायणझावर्यस्य आध्यक्ष्ये समाचरितः। आध्यक्ष्यीयमुद्बोधनं कुर्वन् आचार्यः साहसदुःसाहयोः सत्यासत्ययोः गाम्भीर्यचाञ्चल्ययोः मायायथार्थयोः भयाभययोः विवेकाविवेकयोः शौचाशौचयोः दयानिर्दययोः अन्तरं ज्ञात्वा काचिदपि महिला शक्तिसम्पन्ना भवितुमर्हति इति उक्तवान्।





**उत्कृष्टशिक्षकप्रशस्तिपत्रसम्मानः** - लखनऊपरिसरस्य वार्षिकोत्सवे परिसरनिदेशकेन प्रो. सर्वनारायण- झावर्येण त्रिभ्यः शिक्षकेभ्यः उत्कृष्टशिक्षकप्रशस्तिपत्रसम्मानः प्रादायि। शिक्षाशास्त्रविद्याशाखायाः आचार्यः प्रो. देवीप्रसाद-द्विवेदीवर्यः, डॉ. रुद्रनारायणनरसिंहमिश्रवर्यः एवं व्याकरणविद्याशाखायाः आचार्यः डॉ. गोविन्दपौडेलवर्यः च उत्कृष्टशिक्षकप्रशस्तिपत्रसम्मानेन सम्मानिताः अभूवन्। अन्ते च पुरस्कारवितरणेन पारितोषिकप्रदानेन च वार्षिकोत्सवः सबहुमानं सफलतामितः।

**संस्कृत-ओलम्पियाड-** लखनऊपरिसरस्य व्याकरणविद्याशाखायाः छात्रः धीरजत्रिपाठिनामा केन्द्रीयसंस्कृतविश्वविद्यालयेनायोजितायां संस्कृत-ओलम्पियाड प्रतियोगितायां प्रथमं स्थानं प्राप्नोत्। अखिल-भारतीयशास्त्रोत्सवे हरिद्वारे स्वामिरामदेवस्य बालकृष्णाचार्यस्य कुलपतिः प्रो. श्रीनिवासवरखेडीमहोदयस्य एवञ्च विशिष्टानामन्येषां विदुषां सन्निधौ उत्तराखण्डसर्वकारस्य मुख्यमन्त्री श्रीपुष्करधामीवर्यस्य करारविन्दाभ्यां प्रमाणपत्रं पारितोषिकं च (एकादशसहस्रात्मकं) समवाप्नोत्।



## शृङ्गेरीपरिसरः

कार्यशाला- शृङ्गेरीपरिसरे ०६ तः १२ दिनाङ्कपर्यन्तं कौटिल्यस्य अर्थशास्त्रम् इति ग्रन्थमधिकृत्य सप्ताहव्यापिनी कार्यशाला चिन्तनगोष्ठी च सम्पन्ना। अत्र व्याख्यातृत्वेन आचार्यः हेच् वि नागराजमहाभागः, आचार्यः टि.वि. सत्यनारायणमहाभागः, आचार्यः गङ्गाधरभट्टमहाभागः, आचार्यः शङ्करभट्टमहाभागः, आचार्यः बालाजिमहोदयः, डा. श्रीधरभट्टमहाभागः, डा. शशिकिरण बि.एन्. महोदयः, डा. रामकृष्णपेजत्तायमहोदयः, डा. महेशकाकत्करमहोदयश्च समाहूताः। भारतीयप्राचीनग्रन्थानाम् अर्थशास्त्रादिग्रन्थाध्ययन-कार्यशालायोजनेन भारतीयज्ञानपरम्परायाः महत्वं ज्ञायते। अत्र ३४ छात्राः कौटिल्यस्य अर्थशास्त्रस्य विषये ज्ञानं प्राप्तवन्तः। अध्यापकाः चर्चया स्वज्ञानं वर्धितवन्तः।






राष्ट्रियशिक्षानीतिकार्यशाला- श्रीराजीवगान्धिपरिसरे २० दिनाङ्कतः २४ दिनाङ्कपर्यन्तं विश्वविद्यालयस्यादेशानुसारं परिसरीयप्राध्यापकानां राष्ट्रिय-शिक्षानीत्यनुसारेण संरचितपाठ्यक्रमावगत्यै कार्यशाला समायोजिता। सर्वविद्याशाखीयाध्यापकाः भागं गृहीत्वा कार्यशालया लाभान्विताः अभूवन्। परिसरीयप्राध्यापकाः राष्ट्रियशिक्षानीतेः स्वरूपं ज्ञातवन्तः। एवं पाठ्यक्रमविषयकज्ञानमवाप्य अध्यापने प्रेरणां प्राप्तवन्तः।



गणतन्त्रदिवसः - केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीराजीवगान्धीपरिसरे षट्सप्ततितमः गणतन्त्रदिवसः २६ दिनाङ्के अनुष्ठितः। अस्मिन् शुभावसरे परिसरे प्रातः ०८:३० वादने ध्वजारोहणं परिसरस्य निदेशक-महोदयः आचार्यः हंसधरझावर्यः अकरोत् । तदनु परिसरस्य सभागारे सुदुघायां सभाकार्यक्रमः परिसरस्य निदेशकवर्यस्य आध्यक्ष्ये, गणतन्त्रदिवससमितेः संयोजकस्य आचार्यस्य रामचन्द्रुलबालाजिवर्यस्य समुपस्थितौ प्राचलत्। परिसरस्य अध्यापकाः छात्राः अन्यकर्मचारिणः च सभाकार्यक्रमे समुपस्थिताः आसन्। अस्मिन् सभाकार्यक्रमे छात्राः राष्ट्रभक्तिगीतं, भाषणं, कवितावाचनं, नृत्यं च प्रास्तुवन् । अध्यापकाः अपि भाषणं गीतगानं च अकुर्वन्। सभाध्यक्षः परिसरस्य निदेशकः आचार्यः हंसधरझावर्यः गणतन्त्रदिनमुपलक्ष्य उद्बोधनं कृत्वा संविधानस्य मूल्यानां परिपालनार्थं आग्रहम् अकरोत्। आचार्यस्य उद्बोधनेन परिसरस्य छात्राः देशस्य प्रगतौ योगदानं दातुं प्रेरिताः अभवन्। धन्यवादार्पणेन कार्यक्रमः समाप्तिमगात्। वाग्वर्धिनीपरिषदः कार्यदर्शिप्रभृतयः छात्राः सम्पूर्णकार्यक्रमस्य निर्वहणम् अकुर्वन्।

राष्ट्रियुवदिवसः - केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीराजीवगान्धिपरिसरे २० तः २४ पर्यन्तं राष्ट्रियुवदिवसः युवसप्ताहकार्यक्रमश्च समनुष्ठितः। विशेषतः २२ दिनाङ्के परिसरीयच्छात्राणां भाषणस्पर्धाः आयोजिताः। २३ दिनाङ्के परिसरनिदेशकस्याध्यक्ष्ये समापनसमारोहः समनुष्ठितः। तत्र च विद्वान्.सुधीर.हेच्.एम्.महोदयः अभ्यागतत्वेन समागत्य छात्रान् उद्बोधितवान्। एतदङ्गतया "युवनिधिः" इति धनसंग्रहकार्यक्रमे छात्राः, अध्यापकाः च स्वशक्त्यनुसारं धनं प्रदाय युवनिधिधनसंग्रहकार्यक्रमे सहयोगं प्रदत्तवन्तः।



रूपकमहोत्सवः- तृतीयस्य अखिलभारतीयरूपकमहोत्सवस्य अङ्गतया प्रथमवलयस्तरे सञ्जातायां स्पर्धायां "वासन्तिकस्वप्नम्" रूपकमभिनीय डा. श्रीकरः वि. महोदयस्य मार्गदर्शने राजीवगान्धीपरिसरस्य सप्तदश शास्त्राध्येतारः छात्राः नाटकाभिनये भागं गृहीत्वा द्वितीयस्थानं प्राप्तवन्तः।

**वाक्यार्थपरिषत्-** छात्राणां शास्त्रवाक्यार्थप्रस्तुतिकौशलसंवर्धनाय संस्थापितया वाक्यार्थपरिषदा चतुर्थमधिवेशनं समायोजितम्। तत्र च पञ्चानामध्यापकानां विविधेषु शास्त्रेषु वाक्यार्थः सम्पन्नः। आचार्यः हरिप्रसादवर्यः सभायाः आध्यक्ष्यं वहन् उन्मादः इति शिक्षाशास्त्रीयविषये स्ववाक्यार्थं प्रस्तुतवान्। वेदान्ते भामत्यनुसारं ब्रह्मणः प्रतिपत्तिविधिशेषत्वनिराकरणम् इत्यस्मिन् विषये डा.विश्वनाथहेगडेवर्येण वाक्यार्थः प्रस्तुतः। डा. श्यामसुन्दरवर्येण अवयवातिरिक्तावयविस्थापनम् इति विषये वाक्यार्थः प्रस्तुतः। डा. सुधांशुकुमारनन्दमहोदयेन ज्योतिषे गृहप्रवेशः इति विषये वाक्यार्थः निरूपितः। डा. गोविन्दगोपालकृष्णहेगडेवर्येण मीमांसायां रेवत्यधिकरणम् इति विषये वाक्यार्थः प्रस्तुतः। द्वितीयसत्रे आचार्यः नवीनहोळ्ळवर्यः सभायाः आध्यक्ष्यं वहन् प्रत्यक्षागमाश्रितमनुमानम् इति न्यायशास्त्रीयविषये स्ववाक्यार्थं प्रस्तुतवान्। व्याकरणे क्त्वाप्रत्ययविचारः इत्यस्मिन् विषये डा. प्रमोदभट्टवर्येण वाक्यार्थः प्रस्तुतः। डा. दुर्गाशरणरथवर्येण वेदभाष्ये अयं यज्ञो भुवनस्य नाभिः इति विषये वाक्यार्थः प्रस्तुतः। डा. श्रीनिवासमूर्तिमहोदयेन साहित्ये पुराणहृदयम् इति विषये वाक्यार्थः निरूपितः। डा. भारतीवर्यया व्याकरणे व्यपदेशिवदेकस्मिन् इति विषये वाक्यार्थः प्रस्तुतः।

**वाग्वर्धिनी सभा-** परिसरे छात्राणां वाक्कौशलाभिवृद्धये संचाल्यमाना वाग्वर्धिनीसभा मासस्यास्य द्वितीय-चतुर्थगुरुवासरयोः तत्तद्विद्याशाखायां विद्याशाखासमन्वयकानामाध्यक्ष्ये समनुष्ठिता। प्रथम-तृतीयगुरुवासरयोः सामान्यस्तरे वाग्वर्धिनीसभा समनुष्ठिता। तत्र च छात्राः व्युत्पित्सवः अहमहमिकया भागमूढ्वा लाभान्विताः अभूवन्। छात्राः अधीतविषयेषु चिन्तनं विधाय सभायां प्रस्तुतिकौशलं प्राप्तवन्तः।






**अनुवादकार्यशाला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य आदेशानुसारं "भारतीयभाषासु अनुवादः" इति पञ्चदिनात्मिका कार्यशाला २७ तः ३१ पर्यन्तम् श्रीराजीवगान्धीपरिसरे प्रवृत्ता। कार्यशालायाः उद्घाटनं २७तमे दिनाङ्के सायं ०४:०० वादने अभूत्। उद्घाटनसत्रे परिसरस्य निदेशकः आचार्यः हंसधरझावर्यः कार्यशालायाः उद्घाटनं कृत्वा कुञ्चिका- भाषणम् अकरोत्। सहनिदेशकः आचार्यः चन्द्रकान्तवर्यः भागग्रहीतॄन् अनुवादकान् चोद्दिश्य उक्तवान् यत् अग्रिम-दिनेषु प्रशिक्षुताकार्यक्रमे अस्माकं परिसरस्य छात्राणाम् अनुवादकार्यार्थं सम्यक्तया प्रशिक्षणं सर्वेऽपि मिलित्वा कुर्युः। छात्राः विविधग्रन्थानाम् अनुवादे योग्यतां सम्पाद्य अनुवादक्षेत्रे नैकान् ग्रन्थान् भारतीयभाषायां विशिष्य संस्कृतभाषायाम् अनुवादं कुर्युः। ते च अनुवादक्षेत्रे उद्योगावसरान् प्राप्नुयुः इति तयोः उद्बोधनम् आसीत्। अस्यां कार्यशालायां भागग्राहिभिः हिन्दीभाषातः कन्नडभाषातः तेलुगुभाषातः च संस्कृतभाषायाम् अनुवादः कृतः। संयोजकाः प्रतिदिनम् एकघण्टापर्यन्तम् अनुवादस्य विविधपक्षान् अधिकृत्य व्याख्यानं कृतवन्तः। भागग्रहीतारः केन्द्रीयसंस्कृतविश्वविद्यालयस्य लक्ष्यसम्पादनदृष्ट्या लाभान्विताः अभूवन्। अस्यां कार्यशालायां परिसरस्य विविध-विद्याशाखीयाः प्राध्यापकाः भागग्रहणं कृतवन्तः। ३१ दिनाङ्के कार्यशालायाः समापनम् अभवत्।

**मातृभाषादिवसः -** श्रीराजीवगान्धीपरिसरे २१तमे दिनाङ्के परिसरस्य सुदुघासभाभवने परिसरनिदेशकस्य आचार्यः हंसधरझावर्यस्य आध्यक्ष्ये मातृभाषादिवसः समनुष्ठितः। तत्र च परिसरस्य निदेशकचरः आचार्यः सि. एस्.एस्.नरसिंहमूर्तिवर्यः अभ्यागतत्वेन समागत्य छात्रान् उद्बोधितवान्। परिसरच्छात्राः विविध- राज्यीयाः स्वमातृभाषामाध्यमेन कविताावाचनम् , गीतगायनम्, भाषणं च कृतवन्तः। सर्वे प्राध्यापकाः छात्राः च भागमूढ्वा कार्यक्रमस्य शोभां वर्धितवन्तः। छात्राः भारतीयभाषाणां माहात्म्यं स्वमातृभाषा-तिरिक्त-भाषाविषये ज्ञानं प्राप्तवन्तः।






**राष्ट्रियसङ्गोष्ठी-** फरवरीमासस्य २० दिनाङ्के श्रीराजीवगान्धीपरिसरे ज्योतिषविद्याशाखीया एकदिनात्मिका राष्ट्रियसङ्गोष्ठी समायोजिता। अस्याः सङ्गोष्ठ्याः मुख्यः विषयः आसीत् "शिक्षाक्षेत्रस्य चयने ज्योतिष- शास्त्रस्य भूमिका" इति। सङ्गोष्ठ्यामस्यां विश्वविद्यालयस्य ज्योतिषविद्याशाखायाः अध्यक्षः आचार्यः ईश्वरभट्टमहाभागः उद्घाटकत्वेन समागतः। कार्यक्रममुद्घाट्य आचार्यः शिक्षाक्षेत्रस्य चयने तथा शिक्षाक्षेत्रे छात्रैः अनुभूयमाणसमस्याविषये च ज्योतिषदृष्ट्या आधुनिक्यादृष्ट्या च कारणानि, परिहारमार्गोपायांश्च सम्यक् निरूपितवान्। सारस्वतातिथिरूपेण तृपुणितुरासर्वकारीयसंस्कृतपाठशालायाः ज्योतिषविभागाध्यक्षः आचार्यः ई.एन्. ईश्वरन्-वर्यः समागतः। परिसरनिदेशकः आचार्यः हंसधरझामहाभागः आध्यक्ष्यं वहन् स्वीयविचारान् प्रस्तुतवान्। समन्वयकः डा. विजयानन्द अडिगवर्यः, विविधविद्याशाखाप्राध्यापकाः, छात्राः च स्वीयं विषयं मुख्यविषयानुगुणं निरूपितवन्तः।

**अखण्डरामचरितमानसपारायणम्-** श्रीराजीवगान्धीपरिसरे २२-२३ दिनाङ्कयोः अखण्डरामचरितमानसपारायणम् अनुष्ठितम् । तत्र च छात्राः सम्पूर्णतया श्रद्धया भक्त्या च रामचरितमानसस्य पारायणं कृतवन्तः। अध्यापकाः अपि पारायणे भागं गृहीतवन्तः। छात्रैः भगवतः श्रीरामस्य पूजनं भजनं च कृतम्। वेदभाष्यविद्याशाखीयः सहायकाचार्यः डा.दुर्गाशरणरथमहोदयः धार्मिकोपन्यासं कृतवान्। छात्रैः सर्वेभ्यः प्रसादव्यवस्था परिकल्पिता।



**कुम्भमेला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य आदेशानुसारं श्रीराजीवगान्धीपरिसरस्य ४५ छात्राः १० दिनाङ्क तः २० दिनाङ्क पर्यन्तं वेदान्तविद्याशाखायाः अतिथ्यध्यापकस्य डा. निरञ्जनभट्टवर्यस्य, ब्रह्मभट्ट-नचिकेतसंजयकुमारवर्यस्य च मार्गदर्शने प्रयागराजे पूर्णकुम्भमेलायां भागं गृहीतवन्तः। सर्वे कुम्भस्नानं विधाय प्रयागराजस्थ-गङ्गानाथझापरिसरस्य ग्रन्थालये विद्यमानानां मातृकाग्रन्थानां परिचयं प्राप्तवन्तः।



**रूपकमहोत्सवः** - केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे ११ तः १४ पर्यन्तं प्रवृत्ते अखिलभारतीय- रूपकमहोत्सवे श्रीराजीवगान्धीपरिसरस्य १७ छात्राः वासन्तिकस्वप्नम् इति नाटकम् अभिनीय द्वितीयस्थानं प्राप्तवन्तः। तत्र च छात्राः परिसरस्य अतिथ्यध्यापकयोः डा. आयुष दीक्षितः, कु. सुमनाउडुप इत्यनयोः मार्गदर्शनं प्राप्तवन्तः। अनया प्रस्तुत्या समग्रे देशे श्रीराजीवगान्धीपरिसरस्य छात्राणाम् अभिनयकौशलं प्रसिद्धमभूत्।




**महिलादिवससमारोहः** - श्रीराजीवगान्धीपरिसरे ३ तः ९ दिनाङ्क पर्यन्तम् अन्ताराष्ट्रियमहिलादिनं समाचरितम्। बोधक-बोधकेतर-महिलाकर्मचारिणीनां विविधाः स्पर्धाः समायोजिताः। कार्यक्रमे परिसरीयबालिकानाम् कृतेऽपि स्पर्धायाः आयोजनं कृतम्। महिलादिनाङ्गत्वेन १२ दिनाङ्के सभाकार्यक्रमः संयोजितः। तत्र च डा. पुष्पाहेगडेवर्या सर्वकारीयशाला,तोरेहड्लु अभ्यागतत्वेन समागत्य छात्रान् उद्बोधितवती। सभायाः आध्यक्ष्यं वहन् परिसरनिदेशकः आचार्यः हंसधरझामहोदयः छात्रान् उद्बोधितवान्। महिलादिवसकार्यक्रमेण परिसरीयाः शैक्षिकशैक्षिकेतर- कर्मचारिण्यः आत्मसम्मानभावं कार्यनिर्वाहे उत्साहं च प्राप्तवत्यः। एवं महिलाच्छात्राः स्वप्रतिभायाः अभिव्यक्त्यर्थम् उत्साहम् उचितम् अवसरं च प्राप्तवत्यः।

**छात्रावासदिवसः** - श्रीराजीवगान्धीपरिसरे २० दिनाङ्के छात्रावासदिवसः समाचरितः। तत्र च छात्राः सोत्साहं भागं गृहीतन्तः। माध्याह्निक- विशिष्टभोजनव्यवस्था सर्वेभ्यः परिकल्पिता। अपराह्णे छात्राणां सांस्कृतिककार्यक्रमाः अभूवन्। छात्रावासदिवसाचरणेन छात्रावासीयच्छात्राः सम्भूयकार्यकरणप्रवृत्तिं परस्परमैत्रीभावं च प्राप्तवन्तः।

**राष्ट्रियकार्यशाला** - भारतीयदर्शनाध्ययनानुसन्धानकेन्द्रद्वारा भारतीयदार्शनिकसिद्धान्तेषु सार्वजनीनवैज्ञानिकतत्त्वावलोकनम् इति विषयिणी सप्ताहवितता राष्ट्रियकार्यशाला श्रीराजीवगान्धीपरिसरनिदेशकस्य प्रो. हंसधरझावर्यस्य निर्देशने समायोजिता। तत्र विद्वान् उमाकान्तभट्टवर्यः न्यायभाष्यानुसारं प्रमाणविचारः प्रमेयविचारश्च, प्रो.के.रामसुब्रह्मण्यन्-वर्यः प्रतिबिम्बवादः, अनिर्वचनीयख्यातिः, भारतीयन्यायवैशेषिक सिद्धान्तानां पाश्चात्यपरिष्कारसरणिः, प्रो. मधुसूदनपेन्ना पातञ्जलयोगदर्शनेकैवल्यतत्साधननिरूपणम्, साङ्ख्ये प्रत्ययसर्गः, प्रो. बालमुरुगन् आरम्भवादः, हेत्वाभासप्रभेदः, जातिः,ईश्वरानुमानम् नाम्नां विभागः, डा. गुरुराजकल्कूरवर्यः धर्मप्रमाणानि, ज्ञानानां स्वतः प्रामाण्यम्, वेदस्य अपौरुषेयत्वम्, क्रमबोधकप्रमाणानि, अङ्गताबोधक- प्रमाणानि तेषां प्राबल्य-दौर्बल्यविचारश्च। विद्वान् नीलकण्ठन् औदुम्बराधिकरणन्यायः, सामर्थ्याधिवाक्य- शेषाधिकरणम्, उपक्रमाधिकरणम्, अपच्छेदन्यायः, अतिदेशः, ऊहः, बाधः। विद्वान्.हरिहरन्- तन्त्रम्,प्रसङ्गः,भूयोनुग्रहः, मुख्यानुग्रहः,अङ्गगुणविरोधन्यायः,मीमांसान्यायानां सार्वजनीन् उपयोगः। डा.जानकीशरणाचार्यः- वेदान्तरीत्या बहुभवनं तथा तस्य वैज्ञानिकता, चैतन्यं तथा मस्तिष्कविज्ञानमित्यादि विषयान् स्वीकृत्य कार्यशालायां बहुश्रुतविद्वांसः छात्रान् उद्बोधयन्। विविधक्षेत्रात् समागताः चत्वारिंशदधिकाः व्युत्पित्सवः छात्राः कार्यशालायां भागं विदित्वा लाभान्विताः अभूवन् ।



**अखिलभारतीयच्छात्रप्रातिभसमारोहः** - तिरुपतिस्थ-राष्ट्रियसंस्कृतविश्वविद्यालयेन समायोजिते अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे राजीवगान्धीपरिसरच्छात्राः भागमूढ्वा पुरस्कारान् अवाप्नुवन्। शिवम्-ओझा वेदभाष्यभाषणे द्वितीयस्थानम्, रवितेजा.एम्.एस् मीमांसा-भाषणे,भारतीयज्ञानपरम्परायां च प्रथमद्वितीयस्थानम्, मुक्तालघाटे न्यायभाषणे प्रथमस्थानम्, राहुलमिश्रः अन्त्याक्षरीस्पर्धायां सान्त्वना-पुरस्कारः, नन्दना के पि सांख्ययोगभाषणे द्वितीयस्थानम्, श्रीनिधिभट्टः पुराणेतिहासभाषणे प्रथमस्थानम्। एतैः सर्वैरपि विविधपुरस्कारान् प्राप्य परिसरस्य विश्वविद्यालयस्य च कीर्तिं वर्धितवन्तः।

**व्याकरणकार्यशाला**- श्रीराजीवगान्धीपरिसरे व्याकरणविद्याशाखापक्षतः मार्चमासस्य १० दिनाङ्कतः १२ दिनाङ्कपर्यन्तं महाभाष्ये समर्थाह्निकम् इति विषयिणी त्रिदिवसीया-पङ्क्तिपाठनराष्ट्रियकार्यशाला समनुष्ठिता। आचार्यः एम्.ए.नागराजभट्टमहाभागः, आचार्यः विनायक-उडुप महाभागः च महाभाष्यस्य समर्थाह्निकभागस्य पङ्क्तिपाठनेन छात्रान् उद्बोधितवन्तौ।

**राष्ट्रस्तरीयशास्त्रीयस्पर्धा** – अखिलभारतीयशास्त्रीयस्पर्धाः हरिद्वारस्थपतञ्जलिविश्वविद्यालये १८-२१ दिनाङ्केषु सम्प्रवृत्ताः। तत्र च भागं गृहीत्वा सहना-ज्योतेप्पानरगुन्दा पुराणेतिहासशलाकायां प्रथमस्थानम्, चिन्ताअजयः व्याकरणशलाकायां प्रथमस्थानम्, ध्रुवमहेता भारतीयविज्ञानभाषणे द्वितीयस्थानं च प्राप्नुवन्।

**कार्यशाला** - श्रीराजीवगान्धीपरिसरे साहित्यविद्याशाखापक्षतः १७ तः २१ दिनाङ्कं यावत् भौगोलिकाधारेण कविसमयानुशीलनम् इति विषयिणी पञ्चदिनव्यापिनी कार्यशाला समनुष्ठिता। तिरुपतिस्थराष्ट्रीयसंस्कृतविश्वविद्यालयीयाचार्यः चक्रवर्तीरङ्गनाथन्-महाभागः उद्घाटकत्वेन समागत्य छात्रान् उद्बोधितवान्। परिसरच्छात्राः विदुषां वाक्यार्थश्रवणेन लाभान्विताः अभूवन्।

**राष्ट्रस्तरीयशलाकास्पर्धाः**- संस्कृतभारतीसंस्थया देहलीनगर्यां ७ दिनाङ्के आयोजितायां शलाकादिस्पर्धायाम् राजीवगान्धीपरिसरच्छात्राः जैविकहर्तिः अमरकोशकण्ठपाठे प्रथमम्, सक्षममिश्रः लघुसिद्धान्तकौमुद्यां द्वितीयस्थानम्, सौरभत्रिपाठी ज्योतिषे तृतीयस्थानं प्राप्तवान्। अंशुलशर्मा वेदान्ते एकाकी उत्तमप्रस्तोता अभूत्।

# एकलव्यपरिसरः



**युवदिवसः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरेण जनवरी मासस्य १२ दिनांके राष्ट्रिययुवदिवसः राष्ट्रिययुवसप्ताहश्च आचरितः। कार्यक्रमेऽस्मिन् अगरतलास्थस्य रामकृष्णाश्रमस्य प्रबन्धकः स्वामिभक्तिसुधानन्दवर्यः मुख्यातिथिः आसीत्। छात्राः अध्यापकाः तेन विवेकानन्दवर्याणाम् आदर्शानुसारं अस्माकं जीवनं भवेदिति उद्बोधिताः। सभायाम् अध्यक्षः प्रो. प्रभातकुमारमहापात्रवर्यः आसीत्। प्रो. अवधेशकुमारचौबेवर्यः, प्रो. बी.पि.एम्. श्रीनिवासवर्यः च मञ्चे आस्ताम्। अध्यापकाः छात्राः अन्ये च कर्मचारिणः समुपस्थिताः आसन्। परिसरस्थ छात्राः एतेन प्रेरिताः अभवन्।

**पराक्रमदिवसः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे पराक्रमदिवसः परिपालितः। अस्मिन् कार्यक्रमे मोहनपुरस्य महकुमाशासकः मुख्यातिथ्यं निर्वहन् भारतस्य स्वतन्त्रतायै सुभाषचन्द्रबोसस्य अवदानमुपस्थापितवान्। कार्यक्रमेऽस्मिन् प्रो. अवधेशकुमारचौबेवर्यः, प्रो.वि.पि.एम् श्रीनिवासश्च आस्ताम्। परिसरस्य निदेशकः प्रो. प्रभातकुमारमहापात्रवर्यः कार्यक्रमस्य अध्यक्षतामकरोत्। नेताजीसुभाषचन्द्रबोसवर्यः अस्माकं प्रदेशस्य कश्चन महामानवः आसीत्। उत्तरपूर्वप्रदेशे एव स्वाधीनभारतसङ्कल्पे तेषां विजययात्रा आरब्धा। तेषां स्मरणं सदासर्वदा अस्मान् प्रेरयति।

**राज्यस्तरीयस्पर्धा-** केन्द्रीयसंस्कृतविश्वविद्यालयः प्रतिवर्षं छात्राणां विद्यास्तरवर्धनाय प्रोत्साहनाय च राष्ट्रियस्तरे शास्त्रीयस्पर्धानाम् आयोजनं करोति। तदङ्गतया सर्वेषु राज्येषु राज्यस्तरीयस्पर्धाः समायोज्यन्ते अङ्गसंस्थाभिः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरेण राज्यस्तरीयस्पर्धा जनवरीमासस्य २४-२५ दिनाङ्कयोः प्रो. प्रभातकुमारमहापात्रवर्यस्य आध्यक्षे समायोजिता। कार्यक्रमेऽस्मिन् तिरुपतिस्थ राष्ट्रियसंस्कृतविश्वविद्यालयस्य प्रो. सतीश के एस्.वर्याः मुख्यातिथिरूपेण समाजग्मुः। डॉ. श्रीकरः जी.एन्.वर्यः अस्य समग्रकार्यक्रमस्य संयोजकः आसीत्। उद्घाटनसत्रस्य सञ्चालनं डॉ. सुकान्तप्रामाणिकवर्यः अकरोत्। परिसरस्य सर्वे अध्यापकाः छात्राः कर्मचारिणश्च अस्मिन् उपतस्थुः। वेदान्तभाषणम्, जैन-बौद्धदर्शनभाषणम्, धर्मशास्त्रभाषणम्, साहित्यभाषणम्, साङ्ख्ययोगभाषणम्, न्यायभाषणम्, भारतीयविज्ञानभाषणम्, व्याकरणभाषणम्, आयुर्वेदभाषणम्, वेदभाष्यभाषणम्, मीमांसाभाषणम्, ज्योतिषभाषणम्, व्याकरणशलाका, काव्यकण्ठपाठः, धातुरूपकण्ठपाठः, अष्टाध्यायीकण्ठपाठः, अक्षरश्लोकी, सुभाषितकण्ठपाठः, भगवद्गीताकण्ठपाठः, अमरकोषकण्ठपाठः, उपनिषत्कण्ठपाठः, रामायणकण्ठपाठः, शास्त्रार्थविचारः, शास्त्रीयस्फूर्तिस्पर्धा, समस्यापूर्तिः इत्येतासु स्पर्धासु विविधशास्त्रेषु च कृतपरिश्रमाः सप्तत्यधिकाः छात्राः सोत्साहं भागं जगृहुः। समापनसत्रे श्री यडतोरे योगानन्दसरस्वतीमठस्य श्री श्री शंकरभारतीमहास्वामिनः दिव्यं सान्निध्यं प्राप्तम्। महास्वामिनाम् आशीर्वचनं छात्राणां कृते आशीर्वादप्रदानं पुरस्कारं प्रदानं च विशिष्य मोदावहमभूत्। सर्वासु स्पर्धासु प्रथमस्थानभाजः छात्राः राष्ट्रस्तरीयस्पर्धासु भागं गृहीतारः।





**राष्ट्रियमतदानदिवसः-** जनवरीमासस्य २५तमे दिनाङ्के राष्ट्रियमतदानदिवसस्य परिपालनमाभारते क्रियते। अस्मिन् वर्षे त्रिपुराराज्यस्य पश्चिम त्रिपुरामण्डलस्य मोहनपुर उपप्रभागः इत्यस्य कार्यक्रमोऽयं एकलव्यपरिसरे आयोजितः। यत्र मुख्यातिथित्वेनोपस्थितः आसीत् निर्मलकुमारः, आईएएस (SDM)। राष्ट्रीयस्तरीयमुख्यप्रशिक्षकः सुभाषदत्तः च उपस्थितः आसीत्। एवमेव प्रो. प्रभातकुमारमहापात्रवर्यः, निदेशकः, एकलव्यपरिसरः अगरतला। कार्यक्रमेऽस्मिन् BLO जनानाम् उत्कृष्टसेवार्थं सम्माननं कृतम्। कार्यक्रमस्य समापनं भित्तिपत्रिकायाः उन्मोचनेन जातम्। अस्याः कार्यशालायाः समन्वयकः आसीत् एकलव्यपरिसरस्य ELC क्लाव इत्यस्य नोडल-अधिकारी डॉ. नेपालदासः।

**परीक्षा पे चर्चा-** “परीक्षा पे चर्चा २०२५" इति विषये उत्साहपूर्णः कार्यक्रमः केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे १० दिनाङ्के समभूत्। एकलव्यपरिसरस्य निदेशकः, शिक्षकवृन्दः, संकायसदस्याः, छात्राश्च माननीयप्रधानमन्त्रिणा श्रीनरेन्द्रमोदीवर्येण आयोजितं "परीक्षा पे चर्चा २०२५" इति कार्यक्रमं श्रोतुं संयताः अभवन्। प्रधानमन्त्रिणः मार्गदर्शनतः विद्यार्थिनः परीक्षा सम्बन्धितनावात् विमुक्ताः भवितुं, सकारात्मकचिन्तनं तथा संस्कृताध्ययनं कर्तुं प्रेरिताः अभवन्। एषः संवादः केवलं परीक्षायाः कृते न तु अपितु जीवनसफलतायाः प्राप्तये अपि अतीव प्रेरणादायकः अभवत्।

**त्रिदिवसीया-अखिलभारतीयावैदिकसंगोष्ठी-** महर्षिसान्दीपनिराष्ट्रीयवेदविद्याप्रतिष्ठानम्, केन्द्रीयसंस्कृतविश्वविद्यालयः एकलव्यपरिसरस्य च वेदकर्मकाण्डपौरोहित्यविद्याशाखायाः संयुक्ततत्त्वावधानेन जनवरीमासस्य २९-३१ दिनाङ्केषु समायोजिता त्रिदिवसीया-अखिलभारतीया-वैदिकसंगोष्ठी। संगोष्ठ्यामस्यामुद्घाटनसत्रे मुख्यातिथिरूपेण उपस्थितः आसीत् अगरतलास्थितस्य Techno India इति विश्वविद्यालयस्य कुलपतिः प्रो. रतनकुमारसाहावर्यः। विशिष्टातिथित्वेन सभामलङ्कृतवान् का.हि.वि.वि पूर्वाध्यक्षः तथा च म.सा.रा.वे.वि.प्र. पूर्वसचिवः प्रो श्रीकिशोरवर्यः, विश्वविद्यालयस्य वेदविभागाध्यक्षः प्रो. मनोजकुमारमिश्रवर्योऽपि विशिष्टातिथित्वेन समागतः। अस्य सत्रस्य सारस्वतातिथिः गौहाटिविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वाध्यक्षः प्रो राजेन्द्रनाथशर्मवर्यः आसीत्। विभिन्नेषु प्रदेशेषु प्रायशः ४५ विद्वद्भिः आगत्य उत्कृष्टशोधपत्राणि वाचितानि। समापनसत्रे मुख्यातिथित्वेनास्ताम् अगरतलाभूमिपत्तनस्य प्रबन्धकः श्रीदेवाषीषनन्दीमहाभागः, अगरतलास्थितस्य राष्ट्रियविधिविश्वविद्यालयस्य कुलपतिः प्रो. योगेशप्रतापसिंहवर्यः च। सारस्वतातिथिरूपेण आभासिकमाध्यमेन जर्मनदेशतः प्रो. आनन्दमिश्रवर्यः, कोलकातातः प्रो. रविन्द्रनाथभट्टाचार्यवर्यः एकलव्यपरिसरस्य दर्शनविद्याशाखायाः अध्यक्षः प्रो. अवधेशकुमारचौबेवर्यः एवञ्च प्रो. हृदयरञ्जनशर्मवर्यः सम्पृक्तः आसीत्। संगोष्ठ्याः मार्गदर्शकः प्रो. प्रभातकुमारमहापात्रवर्यः (निदेशकः) आसीत्। अस्याः संगोष्ठ्याः संयोजकः एकलव्यपरिसरस्य वेदकर्मकाण्डपौरोहित्य- विद्याशाखायाः विभागसमन्वयकः डा. प्रकाशरञ्जनमिश्रमहोदयः आसीत्। सहसंयोजकरूपेण प्राध्यापकः डा.आशीषमिश्रवर्यः, डॉ शिवसाधनदेवनाथवर्यश्च आस्ताम्।





**सरस्वतीपूजा-** फरवरीमासस्य ३ दिनाङ्के एकलव्यपरिसरे सरस्वतीपूजायाः आयोजनम् परिसरनिदेशकस्य मार्गनिर्देशने अभवत्। पूजायां परिसरप्राध्यापकाः, छात्राः, कर्मचारिणश्च सोत्साहं भागग्रहणं कृतवन्तः। वेदकर्मकाण्डपौरोहित्यविद्याशाखायाः छात्राः वैदिकमन्त्रोच्चारपुरस्सरं वाग्देव्याः षोडषोपचारपूजनं कृतवन्तः। सांस्कृतिककार्यक्रमेऽस्मिन् छात्रैः भक्तिभावसमन्वितं भजनं, नृत्यं च प्रस्तुतम्। पूजायाः अनन्तरं सर्वेऽपि छात्राः प्रसादं स्वीकृत्य तस्य पवित्रस्मरणे आनन्दिताः अभवन्। एषा पूजा छात्रेभ्यः सांस्कृतिकं धार्मिकं च मूल्यम् अनुभवितुम् महत्वपूर्णम् अवसरं प्रापयत्। अस्यायोजनेन विश्वविद्यालयस्य संस्कृतेः संरक्षणेन सह छात्रेभ्यः एकता सौहार्द्रभावनायाः च विकासः अभवत्।

**बौद्धशास्त्रप्रशिक्षणकार्यशालायाः-** एकलव्यपरिसरे बौद्धशास्त्रप्रशिक्षणकार्यशालायाः उद्घाटनं फरवरीमासस्य ३ दिनाङ्के सम्पन्नम्। मुख्यातिथिः प्रो. वाङ्चुक्-दोर्जेनेगिवर्यः (कुलपतिः, केन्द्रीयतिब्बतीअध्ययनविश्वविद्यालयः, सारनाथः) स्वागतभाषणं कृत्वा "विज्ञप्तिमात्रतासिद्धिः" इति ग्रन्थं विज्ञानवादपरम्परायाः अवगमाय श्रेष्ठमिति निर्दिष्टवान्। विशिष्टातिथिरूपेण उपस्थितः वेणुवनविहारस्य महाथेरो भन्ते खेमासारः भगवान् बुद्धस्य वन्दनां कृत्वा बुद्धोपदेशानां प्रासङ्गिकतां प्रतिपादितवान्। अध्यक्षीयं भाषणं कुर्वन् एकलव्यपरिसरस्य निदेशकः आचार्यः प्रभातकुमारमहापात्रवर्यः बौद्धदर्शनं पालिविद्याशाखायाः स्वीकृतिं सूचितवान् तथा पाठ्यक्रमस्य परिचयं दत्त्वा छात्रेभ्यः एकाग्रतया अध्ययनं कर्तुम् उपदिष्टवान्। अस्मिन् कार्यक्रमे परिसरस्य सर्वेऽपि अध्यापकाः, परिसरच्छात्राः, अरुणाचलप्रदेशात्, असमात्, पश्चिमबङ्गालात्, बिहारात् च आगताः प्रतिभागिनः भागं गृहीतवन्तः। एषा कार्यशाला फेब्रुवरीमासस्य ३ दिनाङ्कतः ९ दिनाङ्कपर्यन्तं प्रवृत्ता।




**विद्वत्सङ्गोष्ठी-** "अगस्त्यर" विषयक एकदिवसीया विद्वत्संगोष्ठी १३ फरवरी २०२५ तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरः तथा चिकित्साज्योतिष-अनुसन्धानसंस्था च संयुक्ततत्त्वावधानेन "अगस्त्यर" विषयक एकदिवसीया विद्वत्संगोष्ठी यथाविधिः सम्पन्ना। अस्याः सङ्गोष्ठ्याः मुख्योद्देशः महर्षि-अगस्त्यस्य जीवनं, ग्रन्थानां ज्योतिषीयं, दार्शनिकं च योगदानं विस्तृतरूपेण विमर्शयितुमासीत्। सङ्गोष्ठ्याः शुभारम्भः वैदिकपरम्परया दीपप्रज्वलनेन सञ्जातः। ततः परिसरस्य वेदविभागस्य छात्रैः वैदिकं लौकिकं च मङ्गलाचरणं प्रस्तुतम्। स्वागतभाषणं डॉ. संबितमहापात्रेण कृतम्। सः महर्षेः अगस्त्यस्य योगदानं वेदाध्ययने, ज्योतिषे, आयुर्वेदे, खगोलशास्त्रे च अनुत्तमम् इति निर्दिष्टवान्। मुख्यातिथिः डॉ. के. एस. सुमन महोदयः महर्षि-अगस्त्यस्य ग्रन्थेषु दार्शनिकं वैज्ञानिकं च दृष्टिकोणं प्रकाशयन् उक्तवान् यत् तस्य योगदानं खगोलशास्त्रे, औषधिविज्ञाने च अद्वितीयमस्ति। अध्यक्षीयं भाषणं कुर्वन् प्रो. प्रभातकुमारमहापात्रवर्यः महर्षेः अगस्त्यस्य बहुमुखं योगदानं विवृत्य तस्य ग्रन्थानां विचाराणां च वैश्विकं प्रभावं निर्दिष्टवान्। कार्यक्रमस्य समापनं डॉ. सौम्यज्योतिसाहामहोदयस्य धन्यवादज्ञापनेन अभवत्। सम्पूर्णसङ्गोष्ठ्याः सञ्चालनं डॉ. आलोककुमारपाण्डेमहोदयेन कृतम्।

**हेमन्तीयकार्यशाला-** एकलव्यपरिसरस्य साहित्यविभागेन आयोजिता महाकविकालिदासकृतं सुप्रसिद्धसंस्कृतमहाकाव्यं 'कुमारसंभवः' इति केन्द्रीकृत्य सप्तदिवसीया हेमन्तीयकार्यशाला यथाविधिः उद्घाटिता। कार्यशालायाः शुभारम्भे डॉ. प्रकाशरञ्जनमिश्रवर्येण वैदिकमङ्गलाचरणं कृतम्, तदनन्तरं छात्रेण जीमलिनाथेन लौकिकमङ्गलाचरणं प्रस्तुतम्। उद्घाटनसमारोहे मुख्यातिथि-रूपेण प्रो. देवनारायणझावर्यः (पूर्वकुलपतिः, कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः) उपस्थितः आसीत्। प्रो. शिवरामशर्मवर्यः (पूर्वाध्यक्षः, साहित्यविभागः, बनारसहिन्दू विश्वविद्यालयः) विशिष्टातिथिरूपेण आगतः। कार्यक्रमस्य अध्यक्षता एकलव्यपरिसरस्य निदेशकः प्रो. प्रभातकुमार-महापात्रवर्येण कृतम्। अवसरेऽस्मिन् परिसरस्य प्राध्यापकाः छात्राश्च समुपस्थिताः आसन्।



**अष्टाविंशत्याः ग्लोरी फेस्ट २०२५-** एकलव्यपरिसरस्य चतुर्दश छात्राः पुरीस्थे 'अष्टाविंशत्याः ग्लोरी फेस्ट २०२५' इत्यस्मिन् विभिन्नेषु आयोजनेषु भागं गृहीतवन्तः। प्रथमवारं परिसरच्छात्राः संस्कृतविश्वविद्यालयैः सह अनेकेषु आधुनिक-विश्वविद्यालयेषु साकं एकस्मिन्मञ्चे प्रदर्शनं कृतवन्तः। प्रिया खनाल, प्राक्शास्त्रीप्रथमवर्षस्य छात्रा समूहचर्चायाम् एकलनाट्ये च प्रथम,द्वितीयस्थानं प्राप्तवती। ग्लोरी किंग तथा ग्लोरी क्वीन प्रतियोगितायां ८५ प्रतिस्पर्धिनां मध्ये ३० सदस्याः चिताः अभवन्। तत्र परिसरस्य रणितः, उदयनः, देवोलिना, नासी, लाबन्या इति पञ्च परिसरच्छात्राः अपि चिताः। रणितदेबनाथः शास्त्रीद्वितीयवर्षस्यछात्रः, ग्लोरी किंग इत्यस्य द्वितीयरनर-अप् रूपेण चितः। देवोलिनया शास्त्रीयनृत्ये स्वप्रतिभां प्रदर्शितवती। समूहनृत्ये तास्मी, रितु, तनुश्री, नासी, सौरूपा, अंकिता इत्येताः पूर्वोत्तरस्य अतीव आकर्षकपरम्परागतं लोकनृत्यं प्रस्तुतवत्यः। प्रस्तुतं स्किट् अतीव हास्यजनकं आसीत्। उदयनः, रणितः, सुनीलः, तनुश्री, तास्मी, प्रिया इत्येताः मिलित्वा दर्शकान् रञ्जितवन्तः। अन्येषु आयोजनेषु यथा- स्थलचित्रणं, प्रश्नोत्तरी, वादविवादः, हास्यचैम्पः, गीतप्रतियोगितायां च अनिकेतः, निवेदिता, तनुश्री, उदयनः, प्रिया इत्येताः महत्त्वपूर्णां भूमिकां निर्वहणं कृतवन्तः। समूहस्य समग्रं प्रदर्शनम् दृष्ट्वा अन्यैः समूहगणैः अपि प्रशंसितवन्तः।



**मातृभाषादिवसः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे मातृभाषादिवसः अत्यन्तोत्साहेन सम्पन्नः। अवसरेऽस्मिन् मुख्यातिथिरूपेण स्वामिविवेकानन्दमहाविद्यालयस्य अध्यापिका डॉ. तुहिनामण्डलमहोदया उपस्थिताऽभवत्। भाषाविविधता तथा बहुभाषिकतायाः महत्वं प्रतिपाद्य, भाषासंरक्षणस्य सांस्कृतिकं शैक्षिकं च महत्वं वर्णितवती। सारस्वतातिथिः बी. पी. एम. श्रीनिवासमहोदयः तथा कार्यक्रमस्य अध्यक्षः प्रो. अवधेशकुमारचौबेमहोदयः (निदेशकप्रभारी, एकलव्यपरिसरः) उपस्थिताः आसन्। अस्मिन् उत्सवे बाङ्गला, ओडिया, असमिया, ककबरक, कन्नड, तमिल, हिन्दी इत्यादिभिः भाषाभिः आचार्याः स्वभाषया लघुव्याख्यानं दत्तवन्तः। छात्रैः बाङ्गला, बिहु, ओडिया नृत्यानि च प्रस्तुतानि। तेन सांस्कृतिकविविधताम् एकता प्रदर्शिता। कार्यक्रमस्य सहसंयोजकः डॉ. सौम्यज्योतिसाहामहोदयः (धर्मशास्त्रविभागः) स्वागतोद्गारं कृतवान् तथा धन्यवादं च प्रदत्तवान्। संयोजिका डॉ. बीनापाणिचन्दमहोदया (बाङ्गलाविभागः) कार्यक्रमे उपस्थितान् सर्वान् अध्यापकान्, कर्मचारीः, छात्रान् च धन्यवादं प्रकटितवती। शान्तिमन्त्रेण कार्यक्रमस्य समापनमभवत्।



**शिक्षकप्रशिक्षणकार्यशाला-** एकलव्यपरिसरस्य शिक्षककौशलविकासकेन्द्रेण फरवरीमासस्य १७ दिनाङ्कमारभ्य २१ दिनाङ्कं यावत् भारतीयज्ञानपरम्परायाः आधुनिकशिक्षणपद्धत्या सह समन्वयनम् इति विषयमाश्रित्य पञ्चदिनात्मिका शिक्षकप्रशिक्षणकार्यशाला आयोजिता। अस्यां कार्यशालायां उपत्रिंशत्प्रतिभागिनः गुजरात,असम, पश्चिमवङ्गत्रिपुराराज्येभ्यः भागम् अगृह्णन्। विशिष्टातिथिरूपेण डॉ. गोपिकृष्णन्-रघुवर्यः, डॉ. पुष्करदेवपुजारीवर्यः, डॉ. दिनकरमराठेवर्यः, डॉ. सुमन के.एस्., डॉ. सत्यदेवमिश्रवर्यः, डॉ. विनायकरजतभट्टप्रभृतयः भारतीयज्ञानपरम्परायाः विषये ज्ञानप्रदं व्याख्यानम् अकार्षुः। सर्वेऽपि प्रतिभागिनः अनया कार्यशालया भारतीयज्ञानपरम्परायां विद्यमानान् विशिष्टांशान् तेषामाधुनिके शिक्षणे समन्वयनं च अबोधिषुः। कार्यक्रमस्यास्य समन्वयकः प्रो. बुलुसु पद्ममित्रश्रीनिवासवर्यः, संयोजकः श्री सुब्रह्मण्यभट्टवर्यः, सहसमन्वयकः डॉ. प्रकाशरञ्जनमिश्रवर्यः च आसीत्। परिसरनिदेशकस्य प्रो. प्रभातकुमार-महापात्रवर्यस्य मार्गदर्शने कार्यक्रमोऽयं सम्पन्नः।





**अन्ताराष्ट्रियमहिलादिवसः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे अन्ताराष्ट्रियनारीदिवससमारोहः समायोजितः। तत्र मुख्यातिथित्वेन उपस्थिताः आसन् ईकफाई-विश्वविद्यालयस्य विधिविभागस्य प्राध्यापिका डा. जिगीषापुजारीमहोदया। विशिष्टातिथिपदं परिसरस्य प्रो. अवधेशकुमारचौवेमहोदयेन अलङ्कृतम्। सिपाईपाड़ा ग्रामस्य सरपञ्चमहोदया श्रीमतिसुखिनीदेवबर्मामहोदया तथा समाजसेविका श्रीमतिदीपालिदेवबर्मावर्या अपि अतिथित्वेन उपस्थिता आसीत्। परिसरनिदेशकः प्रो. प्रभातकुमारमहापात्रवर्यः ऑनलाईन माध्यमेन अध्यक्षपदम् अलङ्कृतवान्। अवसरेऽस्मिन् वक्तारः नारीणाम् अधिकारविषये स्थितिविषये च आलोचितवन्तः। अवसरेस्मिन् परिसरस्य प्राध्यापिकानां कर्मयोगिनीनां च सम्माननम् अभवत्।

**स्वास्थ्यशिविरविवरणम्-** मार्चमासस्य २० दिनाङ्के एकलव्यपरिसरे बहूद्देश्यीयसभागारे ILS चिकित्सालयस्य सहयोगेन स्वास्थ्यशिविरं समायोजितम्। तत्र चिकित्सालयतः एको दलः समागतः आसीत्। दले चिकित्सकद्वयं दश स्वास्थ्यसहकारिणः तथा यन्त्रोपकरणादिकमासीत्। प्रातः दशवादनतः शिविरमिदं पंचवादनपर्यन्तमचलत्। आदौ चिकित्सकदलस्य स्वागतं परिसरेण विहितम्। तदनु चिकित्सकाभ्यां दिनचर्याद्वारास्वास्थ्यरक्षाविषयः भाषणमाध्यमेन बोधितः। सत्रस्य सञ्चालनं परिसरच्छात्रजिमलीनाथद्वारा अभवत्। सत्राध्यक्षः परिसरनिदेशकः प्रो. प्रभातकुमारमहापात्रमहोदयः आसीत्। मुख्यातिथिः ILS चिकित्सालयस्य चिकित्सकः डॉ. टी नरेश बाबुमहोदयः आसीत्। विशिष्टातिथिश्च चिकित्सालयस्य प्रबन्धकः अमरजीतसरकारमहोदयः आसीत्। स्वागतभाषणं कार्यक्रमसंयोजकेन प्राध्यापक डॉ. नंददुलालमण्डलेन कृतम्। प्राध्यापकेन डॉ. आशिषमिश्रेण धन्यवादः ज्ञापितः। सत्रसञ्चालनं प्राध्यापक डॉ. स्वर्गकुमारमिश्रः कृतवान्। शिविरे एकादशवादनतः स्वास्थ्यपरीक्षा आरब्धा। छात्राणामनुपदं हृद्रक्तपरीक्षादिकमभवत्। तदाधारेण चिकित्सकाभ्यामुपदेशपत्रमपि लिखित्वा एकैकं प्रबोधितम्। स्वास्थ्यपरीक्षायां सर्वे छात्राः आचार्याः सहकारिणश्च भागं गृहीतवन्तः। प्रायः सर्वेषां स्वास्थ्यं समीचीनमासीत्। पंचवादन पर्यन्तम् चिकित्सकदलो निवृतः।

**छात्रावासदिवसः-** २२ मार्च २०२५तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरे अगरतलायाम् प्रथमछात्रावासदिवसस्य आयोजनम् अभवत्। अध्यक्षरूपेण एकलव्यपरिसरस्य निदेशकः प्रो. प्रभातकुमारमहापात्रवर्यः स्वीयं दायित्वं निर्वहन् कार्यक्रमस्य सञ्चालनं कृतवान्। उद्घाटनसत्रे मुख्यातिथिरूपेण पद्मश्री प्रो. अरुणोदयसाहावर्यः (पूर्वकुलपतिः, त्रिपुराविश्वविद्यालयस्य) उपस्थितः आसीत्। विशिष्टातिथिरूपेण डॉ. ए. रंगनाथवर्यः (कुलसचिवः ईकफाईविश्वविद्यालयस्य) कार्यक्रमे भागं ग्रहीतवान्। सारस्वतातिथिरूपेण डॉ. यु.वि. रमणमूर्तिवर्यः (संस्कृतविभागाध्यक्षः, सि.वि.आर.महाविद्यालयः, विजयवाडा) अनुग्रहम् प्रदत्तवान्। समापनसमारोहे मुख्यातिथिरूपेण प्रो. विजयकुमारकर्णवर्यः (छात्रकल्याण-अधिष्ठाता, नवनालन्दामहाविहारविश्वविद्यालयः) ओजस्विना उत्साहपूर्णभाषणेन छात्रसम्पदां सम्यक् पोषितवान्। छात्रावासदिवसमुपलक्ष्य परिसरे नृत्यं, संगीतं, काव्यलेखनम्, कथालेखनम्, योगाभ्यासः, सामान्यज्ञानम्, क्रिकेट्, बॉलिबाल, कबड्डी, फुट्बॉल् इत्यादीनां त्रयोविंशति-प्रतियोगितानाम् आयोजनम् अभवत्। प्रथमं, द्वितीयं, तृतीयं स्थानं प्राप्तवन्तः छात्राः सन्मानपत्रैः पुरस्कारैश्च सम्मानिताः अभवन्। अस्य छात्रावासदिवसस्य आयोजनं बालकछात्रावासाधीक्षकद्वयं– डॉ. सौम्योज्योतिसाहा, डॉ. दिवेशशर्मा तथा च बालिकाछात्रावासाधीक्षिकाद्वयं– डॉ. बीणापाणिचन्दा, श्रीमती पारबीनदेबबर्मा च स्वीयेन समर्पितेन प्रयासेन साधितम्।

## नासिकपरिसरः



**विश्वहिन्दीदिवसः-** केन्द्रीयसंस्कृतविश्वविद्यालयः नासिकपरिसरः, यूनियनबैंक-ऑफइण्डिया इत्यनयोः संयुक्ततत्त्वावधाने विश्वहिन्दीदिवसस्य १०.०१.२५तमे दिनाङ्के आयोजनं कृतम्। मुख्यातिथित्वेन यूनियनबैंक-ऑफ इण्डिया नासिकविभागस्य प्रबन्धकः श्रीजगमोहनदुबेमहोदयः उपस्थितः आसीत्। प्रसङ्गेऽस्मिन् छात्राणां कृते काव्यपाठगीतगायनस्पर्धानाम् आयोजनं कृतम्। कार्यक्रमस्य अध्यक्षः सहनिदेशकः प्रो. रामचन्द्रः जोयिसमहोदयः, कार्यक्रमस्य समन्वयकः सञ्चालकः च डॉ. शङ्कर-आंधले महोदयः आसीत्। स्वागतभाषणं वीरेन्द्रसिंहचौधरी धन्यवादज्ञापनं डॉ. विद्याधरप्रभलः च कृतवान्।



**राष्ट्रिययुवसप्ताहः-** स्वामीविवेकान्दजयन्तीमुपलक्ष्य परिसरे १२.०१.२५ तः १९.०१.२०२५ पर्यन्तं राष्ट्रीययुवसप्ताहस्य आयोजनं कृतम्। सप्ताहेऽस्मिन् छात्राणां कृते भाषणस्पर्धा आयोजिता। १४.०१.२०२५ दिनाङ्के विशिष्टव्याख्यानस्य आयोजनं कृतम् । कैलासमठस्य न्यासी सत्यप्रकाशब्रह्मचारी मुख्यातिथित्वेन उपस्थितः आसीत्। परिसरनिदेशकः प्रो. श्रीगोविन्दपाण्डेयमहोदयः कार्यक्रमस्य अध्यक्षतां निरवहन्। कार्यक्रमस्य समन्वयकः डॉ.विद्याधरप्रभलः आसीत्।



**राज्यस्तरीयशास्त्रीयस्पर्धा-** नासिकपरिसरे १७.०१.१५ दिनाङ्के राज्यस्तरीयस्पर्धानाम् आयोजनं कृतम्। स्पर्धार्थं ४८ छात्राः प्रतिभागिनः आसन्। निर्णायकत्वेन विभिन्नविषयज्ञाः सप्त निर्णायकाः उपस्थिताः आसन्। २१ छात्राणाम् अखिलभारतीयस्तरे चयनम् जातम्। एषा स्पर्धा कैलासमठस्य सहयोगेन कैलासमठे सञ्चालिता। स्वामिसंविदानन्दवर्येण समारोपकार्यक्रमे छात्राः उद्बोधितः स्पर्धायाः सुष्ठु आयोजनार्थं विश्वविद्यालयः च प्रशंसितः। स्पर्धायाः संयोजकत्वेन प्रो. रामचन्द्रजोयिसवर्येण सहसंयोजकत्वेन डॉ. संदीपजोशीवर्येण कार्यं निरूढम्।



**गणतन्त्रदिनम्-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरे २६.०१.२०२५ दिनाङ्के गणतन्त्रदिनस्य सोत्साहम् आचरणं कृतम्। परिसरस्य निदेशकः प्रो. श्रीगोविन्दपाण्डेयवर्यः ध्वजविमोचनं कृतवान्। परिसरस्य छात्राः विभिन्नसांस्कृतिककार्यक्रमान् प्रदर्शितवन्तः। प्रसङ्गेऽस्मिन् परिसरस्य टाकेकरशिक्षा- संङ्कुलस्य च अध्यापकाः छात्राः च उपस्थिताः आसन्।



**अखिलभारतीयशास्त्रसभा-** केन्द्रीयसंस्कृतविश्वविद्यालयः नासिकपरिसरः महर्षिगौतमगोदावरीवेदविद्या प्रतिष्ठानम् इत्यनयोः संयुक्ततत्त्वावधाने अखिलभारतीयशास्त्रसभायाः आयोजनं २६.०१.२०२५ तः २८.०१.२०२५ पर्यन्तं कृतम्। पं. देवदत्तपाटीलवर्यस्य आध्यक्ष्ये एषा सभा आयोजिता। भारतस्य विभिन्नप्रान्तेभ्यः २२ विद्वांसः सभायां वाक्यार्थं प्रास्तुवन्। कार्यक्रमस्य समन्वयकः डॉ. कुमारः वे.मू. रवीन्द्रपैठणे, संयोजकः डॉ.गणपतिहेगडे सहसंयोजकः डॉ. कार्तिकभागवतः श्री. सागररेड्डी च आसीत्। समारोपकार्यक्रमे नाशिक- जनपदस्य जिल्लाधिकारीमहोदयः श्री. जलजशर्मा भारतीयदार्शनिकानुसन्धानपरिषदः सदस्यः प्रो. सच्चिदानन्दमिश्रमहोदयः च उपस्थितः आसीत्।



**सङ्गोष्ठी-** परिसरे २९.०१.२०२५ दिनाङ्के भारतीयचिकित्सायाम् अगस्त्यमहर्षेः योगदानम् इत्यमुं विषयमधिकृत्य एकदिनात्मिका सङ्गोष्ठी आयोजिता। अस्यां सङ्गोष्ठ्यां विषयज्ञरूपेण वैद्यः एकनाथकुलकर्णीमहोदयः उपस्थितः आसीत्। सङ्गोष्ठ्यां पञ्च शोधपत्राणि प्रस्तुतानि। कार्यक्रमस्य अध्यक्षत्वेन परिसरस्य सहनिदेशकः प्रो.रामचन्द्रमहोदयः उपस्थितः आसीत्। कार्यक्रमस्य समन्वयकः डॉ. कुमारः आसीत्।

**सरस्वतीपूजनोत्सवः-** परिसरे ०३.०२.२०२५ दिनाङ्के सरस्वतीपूजनोत्सवः आयोजितः। परिसरस्य निदेशकः प्रो.श्रीगोविन्दपाण्डेयमहोदयः सरस्वत्याः पूजनं कृतवान्। कार्यक्रमस्य संयोजनम् डॉ. दीपान्वितादासमहोदयया कृतम्।



**हैमन्तीया कार्यशाला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरेण ३०.०१.२०२५ तः ०५.०२.२०२५ पर्यन्तं सीतारामप्रतिष्ठानम्, पेजावरमठः इत्यत्र छात्राणां हैमन्तीया कार्यशाला संक्षेपरामायणमधिकृत्य आयोजिता आसीत्। कार्यशालानिमित्तं विभिन्नपरिसरेभ्यः चत्वारिंशदुत्तरावेदनानि प्राप्तानि। तेषु ३० छात्राः उपस्थिताः आसन्। कार्यशालायां ५ मार्गदर्शकाः उपस्थिताः आसन्। कार्यशालायाः समन्वयकः प्रो.रामचन्द्रजोयिसमहोदयः आसीत्। संयोजकौ डॉ. विद्याधरप्रभलः, डॉ.संदीपजोशी आस्ताम्। उद्घाटनसत्रे विश्वविद्यालयस्य कुलपतीनां प्रो.श्रीनिवासवरखेडीवर्याणाम् उद्बोधनं जातम्। समापनसत्रे डेक्कनविश्वविद्यालयस्य कुलगुरुः प्रो. प्रसादजोशीमहोदयः उपस्थितः आसीत्। अनया कार्यशालया उपत्रिंशत् छात्राः संक्षेपरामायणस्य आद्यन्तं व्याकरणादिदृष्ट्या ज्ञानं प्राप्तवन्तः ।



**वार्षिकस्पर्धाः-** परिसरे १७.०२.२०२५ तः २१.०२.२०२५ पर्यन्तं वार्षिकस्पर्धानाम् आयोजनं कृतम्। तत्र शैक्षिकसांस्कृतिकक्रीडास्पर्धाः च आयोजिताः। शैक्षिकस्पर्धासु षट् स्पर्धाः, सांस्कृतिकस्पर्धासु पञ्चस्पर्धाः, क्रीडास्पर्धासु पञ्चदशस्पर्धाः आयोजिताः आसन्। विभिन्नस्पर्धासु परिसरस्य छात्राः सोत्साहं भागं गृहीतवन्तः। विभिन्नक्रीडाशैक्षिकसांस्कृतिकस्पर्धासु प्रातिभप्रदर्शनस्य अवसरः छात्राणां कृते प्राप्तः ।



**श्रीशिवजन्मोत्सवः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरे १९.०२.२०२५ दिनाङ्के श्रीशिवाजी- महाराजस्य जयन्त्युत्सवः आचरितः। मुख्यातिथित्वेन डॉ. गजाननअम्भोरेमहोदयः मुख्यवक्तृत्वेन डॉ.संदीपजोशीमहोदयः च उपस्थितः आसीत्। परिसरस्य छात्राः भाषणे शिवचरित्रम् उपस्थापितवन्तः। कार्यक्रमस्य आध्यक्ष्यं परिसरस्य निदेशकवर्येन प्रो. श्रीगोविन्दपाण्डेयवर्येण निरूढम्। सञ्चालनम् आचार्यकक्ष्यायाः छात्रेण विश्वदीपथिटे इत्यनेन कृतम्। कार्यक्रमस्य संयोजकः डॉ. शङ्कर-आन्धळेमहोदयः आसीत्। अनेन छात्राः शिवचरित्रस्य विषये ज्ञातवन्तः।



**मातृभाषादिवसः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरे २१.०२.२०२५ दिनाङ्के मातृभाषादिवसः आचरितः। मुख्यातिथित्वेन पं. किशोरलिमयेमहोदयः उपस्थितः आसीत्। प्रसङ्गेऽस्मिन् छात्राणां निबन्धलेखनस्पर्धा आयोजिता आसीत्। कार्यक्रमस्य आध्यक्ष्यं परिसरस्य निदेशकवर्येण प्रो. श्रीगोविन्दपाण्डेयवर्येण निरूढम्। कार्यक्रमस्य संयोजकः सञ्चालकः च डॉ.शैलेशपवारमहोदयः आसीत्।

**संस्कृतसम्भाषणकौशलवर्धनवर्गः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरेण २४.०२.२०२५ तः ०५.०३.२०२५ पर्यन्तं संस्कृतसम्भाषणकौशलवर्धनवर्गस्य आयोजनं कृतम्। अस्मिन् वर्गे परिसरस्य विभिन्नविद्याशाखायाः सर्वेऽपि छात्राः उपस्थिताः आसन्। वर्गस्य मार्गदर्शकौ डॉ. विद्याधरप्रभलः, डॉ. संदीपजोशी आस्ताम्। वर्गे शिक्षकत्वेन श्रीकेयूरकुलकर्णी, श्रीविश्वदीपथिटे इत्येतौ कार्यं निरूढवन्तौ। समापनसत्रे मुख्यातिथित्वेन संस्कृतभारत्याः नासिकविभागसंयोजकः श्रीसन्दीपदेशमुखमहोदयः, पश्चिमप्रान्तक्षेत्रमन्त्री डॉ. गजानन अम्भोरेमहोदयः, पश्चिममध्यक्षेत्रसङ्घटनमन्त्री संजीवकुमारमहोदयः च उपस्थिताः आसन्। छात्राः सम्भाषणकौशले प्रवृत्ताः, सम्भाषणसम्बद्धान् विभिन्नविषयान् ज्ञातवन्तः। सम्भाषणं कर्तुम् आत्मविश्वासं च प्राप्तवन्तः।



**अन्ताराष्ट्रीयमहिलादिनम्-** परिसरे १०.०३.२०२५ दिनाङ्के अन्ताराष्ट्रीयमहिलादिनस्य आयोजनं कृतम्। अस्मिन् कार्यक्रमे मुख्यातिथित्वेन श्रीमती कवितापाटीलमहोदया उपस्थिता आसीत्। कार्यक्रमस्य समन्वयकः डॉ.विद्याधरप्रभलः आसीत्। परिसरस्य सहनिदेशकः प्रो.रामचन्द्रजोयिसमहोदयः आध्यक्ष्यम् आवहत्। छात्रेषु महिलासम्माननस्य विषये जागरूकता प्रवृद्धा।



**रक्तदानशिबिरम्-** परिसरे १७.०३.२०२५ दिनाङ्के राष्ट्रीयसेवायोजना NSS प्रकोष्ठद्वारा रक्तदानशिबिरस्य आयोजनं कृतम। अर्पणरक्तदानसंस्थायाः नासिकपरिसरस्य च संयुक्ततत्त्वावधाने एषः कार्यक्रमः आयोजितः आसीत्। परिसरस्य छात्राः आध्यापकाः च अत्र सोत्साहं भागं गृहीत्वा रक्तदानं कृतवन्तः। शिरस्त्रं,प्रमाणपत्रादीनां प्रदानेन रक्तदातॄणां सम्माननं कृतम्। अस्य कार्यक्रमस्य समन्वयकः डॉ. विद्याधरप्रभलः संयोजकः डॉ. दशरथभरासागरमहोदयः आसीत्।



**वार्षिकोत्सवः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य नासिकपरिसरे २४.०३.२०२५ दिनाङ्के वार्षिकोत्सवः आचरितः। अस्मिन् कार्यक्रमे मुख्यातिथित्वेन महंतसुधीरदासमहाराजः, टाकेकरशिक्षासंकुलस्य प्रमुखः श्रीभारतटाकेकरमहोदयः च उपस्थितः आसीत्। कार्यक्रमेऽस्मिन् विभिन्नस्पर्धासु प्राप्तपुरस्काराणां छात्राणां सम्माननं कृतम्। छात्राः नृत्यगीतादीन् विभिन्नसांस्कृतिककार्यक्रमान् प्रास्तुवन्। परिसरस्य निदेशकः प्रो. श्रीगोविन्दपाण्डेयवर्यः कार्यक्रमस्य आध्यक्ष्यं निरवहत्। कार्यक्रमस्य संयोजनसमितौ प्रो. रामचन्द्रजोयिसः, डॉ.कुमारः, डॉ.गणपतिहेगडे इत्येते आसन्।



**छात्रावासदिवसः-** नासिकपरिसरे २५.०३.२०२५ दिनाङ्के छात्रावासदिवसः आचरितः। मुख्यातिथित्वेन नवोदयविद्यालयस्य निवृत्तप्राचार्यः श्रीजालंदरहुलेमहोदयः उपस्थितः आसीत्। श्रीजालंदरमहोदयः स्वीयभाषणे छात्रावासे निवासस्य बहुविधलाभान् प्रतिपादितवान्। प्रसङ्गेऽस्मिन् छात्राणां प्रातिभप्रदर्शनकार्यक्रमाणाम् आयोजनं कृतम्। छात्रावासाधिष्ठाता प्रो.रामचन्द्रजोयिसमहोदयः छात्रावासप्रतिवेदनम् उपस्थापितवान्। परिसरस्य निदेशकः प्रो.श्रीगोविन्दपाण्डेयवर्यः कार्यक्रमस्य आध्यक्ष्यं निरवहत्।

# श्रीरघुनाथकीर्तिपरिसरः

**राज्यस्तरीयशास्त्रीयस्पर्धाः-** केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानायाः द्विषष्टितम्याः अखिलभारतीयशास्त्रीयस्पर्धायाः अङ्गत्वेन उत्तराखण्डराज्यस्तरीयशास्त्रीयस्पर्धाः २०२४-२५ श्रीरघुनाथकार्त्तिपरिसरे देवप्रयागे सम्पादिता। स्पर्धाकार्यक्रमस्य सुचारु-सम्पादनार्थं निदेशकमहोदयेन आयोजनसमित्याः गठनं विहितम्, अस्यां डॉ. शैलेन्द्रनारायणकोटियालः संयोजकः, डॉ. ब्रह्मानन्दमिश्रः, डॉ सुशीलप्रसादः, डॉ. सोमेशबहुगुणा, श्री अङ्कुरवत्सः, श्रीरजतगौतमछेत्री इतीमे प्राध्यापकाः नानाव्यवस्थासु विनियुक्ताः। निदेशकानां मार्गदर्शने संयोजक-सहसंयोजकाभ्यां समग्रराज्यस्य संस्कृतविद्यालय-महाविद्यालय-गुरुकुलम्-पारम्परिकविद्यालयेषु प्रतिभागार्थम् आमन्त्रण-पञ्जीकरण-प्रपत्राणि च प्रेषितानि, दूरभाषेणापि सम्पर्कं साधितम्। उत्तराखण्डराज्यस्य संस्कृतशिक्षानिदेशकमहोदयाय अपि प्रादेशिकविद्यालयेषु सूचनाप्रेषणार्थं नियमावलीसहितं पत्रं प्रेषितम्। अस्माकं परिसरे राज्यस्तरीयस्पर्धाः जनवरी मासस्य १८-१९ दिनाङ्कयोः महता हर्षोल्लासेन सम्पन्नाः सञ्जाताः। आहत्य त्रयोविंशतिस्पर्धाः अस्माभिः नियमानुरूपं सम्पादिताः। स्पर्धासु श्रीदयानन्द-आर्षगुरुकुलम्, पतंजलिविश्वविद्यालयः, पतंजलिगुरुकुलम्, श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालयः, वैदिककन्यागुरुकुलम्, पतंजलिगुरुकुलम् मूल्याग्रामः, श्रीरघुनाथकीर्तिपरिसरः, पारम्परिकगुरुकुलम् इत्येताभ्यः शिक्षणसंस्थाभ्यः समागताः एकोननवति स्पर्धालवः अत्र भागं गृहीतवन्तः।






**शास्त्रपरिसंवादसभा-** धर्मसम्राट्स्वामिश्रीकरपात्रिमहाराजवेदशास्त्रानुसन्धानकेन्द्रद्वारा गतमासे एव निर्णयः स्वीकृतः यत् प्रतिमासं केन्द्रे शास्त्रपरिसंवादसभायाः आयोजनं करिष्यत इति। तदाधादरेणैव अस्मिन् द्वितीये पर्याये माघमासस्य कृष्णनवम्यां तदनुसारेण २३.०१.२०२५ तमे दिनाङ्के शास्त्रपरिसंवादसभायाः आयोजनं कृतम्। अस्यां परिसंवादसभायां परिसरस्य व्याकरणविभागीये बालिके भागमगृह्णीताम्। तयोश्च मार्गदर्शनं व्याकरणविभागीयेन डॉ. गणेश्वरनाथझावर्येण कृतमासीत्। पूजानेगी तथा च माधुरी इत्याख्ये शास्त्रितृतीयवर्षीये बालिके एते। छात्रयोरेतयोः भट्टोजिदीक्षितेन विरचितायां वैय्याकरणसिद्धान्तकौमुद्यायां मङ्गलाचरणे "मुनित्रं नमस्कृत्य तदुक्तीः परिभाव्य च" इत्यत्र नमः शब्दयोगे चतुर्थी किमर्थन्न इत्यस्मिन् विषये एकघण्टा पर्यन्तं समीचीनतया शास्त्रोक्तरीत्या परिसंवादः कृतः। बालिकाभ्यां प्रतिपादितं यत् नमः स्वस्ति स्वाहा स्वधा अलं वषड्योगे सत्यपि किमर्थं न चतुर्थीविभक्तेः प्रयोगः दीक्षितैः कृतः। यश्च प्रयोगः ग्रन्थकारेण कृतः स शुद्धः इत्यपि ताभ्यां प्रतिपादितः। तत्रापि पूर्वपक्षरूपेण पूजा नेगी इत्याख्या छात्रा आसीत् तथा च सिद्धान्तपक्षिणत्वं माधुर्या ऊढम्। भारतीयशास्त्रार्थचिन्तनपरम्परायाः प्रसारः, छात्रेसु जिज्ञासायाः समाधानस्य च प्रवृत्तिः अस्याः शास्त्रपरिसंवादसभायाः माध्यमेन विस्तारं प्राप्नोति।

**श्रीमद्भगवद्गीतामृतज्ञानच्छात्रसङ्गोष्ठी-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे वेदशास्त्रानुसन्धानकेन्द्रेण २१/०२/२०२५ दिनांकात् २३/०२/२०२५ पर्यन्तं श्रीमद्भगवद्गीतामृतज्ञानच्छात्रसङ्गोष्ठी समायोजिता। यत्र आहत्य १०० छात्राः श्रीमद्भगवद्गीतासम्बद्धविषयं स्वीकृत्य शोधपत्रं पठितवन्तः। अस्य कार्यक्रमस्यायोजनम् अन्तर्जालमाध्यमेन साक्षाच्च कृतमासीत्। उद्घाटनसत्रे परिसरनिदेशकेन प्रो.पी.वी.बी.सुब्रह्मण्यम महोदयेन छात्राः सम्बोधिताः। श्रीज्वाल्पादेवी-आदर्शसंस्कृतमहाविद्यालयस्य प्राचार्यः डा. ममतामेहरामहोदया तत्र मुख्यातिथिरूपेण समुपस्थिता आसीत्। तया गीतायां निहितानां मानवीयमूल्यानां अवधारणायाः विषये स्ववक्तव्यं समुपस्थापितम्। वेदशास्त्रानुसन्धानकेन्द्रस्य संयोजिका प्रो. चन्द्रकला आर्. कोण्डीमहोदया गीतायाः आध्यात्मिकविषयं स्वीकृत्य स्वविचारान् तत्र प्रस्तुतवती। अत्र त्रीणि सत्राणि साक्षान्माध्यमेन पंचसत्राणि आनलाइनमाध्यमेन समायोजितानि। कार्यक्रमेऽस्मिन् सर्वैः प्राध्यापकैः निर्णायकत्वेन संचालकत्वेन च स्वभूमिका निर्व्यूढा। २३ दिनाङ्के समापनसत्रे देवसंस्कृतिविश्वविद्यालयात् संस्कृतविभागाध्यक्षा डा. शशिकलासाहुमहोदया छात्रान् सम्बोधितवती। अस्य कार्यक्रमस्य संयोजकः डा. सच्चिदानन्दस्नेहीमहोदयः आसीत्।



**महाकुम्भमेला-** शास्त्रीयवचनानां परम्पराणामनुपालनमस्मदेशे अधुनापि भवतीति सर्वविदितमेव, मानवजीनवे परम्पराणां सार्वकालिकी सार्वदेशिकी च प्रासङ्गिकता भारतीयज्ञानपरम्परायाः वैशिष्ट्यमभिव्यञ्जयति। तादृशानां परम्पराणां शैक्षिकदृष्ट्या अध्ययनं कर्तुम् अनुभूतिं च प्राप्तुं कुलपतिमहोदयस्य मार्गदर्शने केन्द्रीयसंस्कृतविश्वविद्यालयस्य छात्राणां दलं प्रयागराजनगरं गमिष्यति इति कश्चन निर्देशो मुख्यालयस्य आसीत् तदनुसारं श्रीरघुनाथकीर्तिपरिसरस्य चिताः उपपञ्चाशच्छात्राः मार्गदर्शकैस्सह फरवरीमासस्य तृतीयदिनाङ्कतः सप्तमदिनाङ्कं यावत् महाकुम्भदर्शनं कृतवन्तः। प्रथमं २०८१ तमे वैक्रमाब्दे माघशुक्लपञ्चम्यां तदनुसारेण ०३/०२/२०२५ दिनाङ्के प्रातः ११ वादने निदेशक- महोदयस्य प्रो. पी.वी.बी. सुब्रह्मण्यमहोदयानामाशीर्वचोभिः श्रीरघुनाथकीर्तिपरिसरतः यात्रा प्रारब्धा। गङ्गानाथझापरिसरं प्राप्य छात्राः अल्पाहारभोजनादिकं कृत्वा ततः प्रायः एकवादने प्रस्थीय चतुर्वादने कुम्भक्षेत्रं सङ्गमं प्राप्य महाकुम्भस्नानं विहितम्। महाकुम्भस्नानं विधाय कुम्भक्षेत्रस्य विविधस्थलेषु शैक्षणिकभ्रमणं कृतं तत्र मुख्यतया गोवर्धनपीठाधीश्वराणां जगद्गुरूणां निश्चलानन्दसरस्वतीमहाराजानां आशीर्वादः लब्धः। महाकुम्भमेलायां सहभागित्वेन छात्रैः अध्यापकैश्च भारतीयधार्मिकैकता,भारतीयसंस्कृतिः,परम्परा,सांस्कृतिकैकतायाः वैशिष्ट्यादिकञ्च निकटतया अनुभूतम्, एवं भारतीयसांस्कृतिकनिधेः महत्त्वं सामुहिकीं भावनां चावगन्तुम् अवसरो लब्धः।








**सततचिकित्साशिक्षा (CME) कार्यशाला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे मार्चमासस्य २१ दिनाङ्कतः २७ दिनाङ्कपर्यन्तम् अन्ताराष्ट्रियोगकेन्द्रस्य, तथा अध्यात्मविद्याशाखायाः संयुक्ततत्त्वावधाने सप्तदिवसीया योगप्रशिक्षणकार्यशाला समाचरिता। उपक्रमस्यास्योद्देश्यं तावत् राष्ट्रियशिक्षानीतेः अनुसारं योगाभ्यासानाम् अनुप्रयोगे योगाध्यापकानां सामर्थ्यवर्धनम् आसीत्। प्रतिभागित्वेन भारतस्य विभिन्नेभ्यः अष्टभ्यः राज्येभ्यः दशविश्वविद्यालयेभ्यः च प्रतिभागिनः समागता आसन्। उद्घाटनसत्रे पतञ्जलिविश्वविद्यालयस्य भूतपूर्वकुलसचिवः, प्रो. जी. डी. शर्महोदयः मुख्यातिथिः आसीत्। विषयनिरूपणाय प्रसिद्धाः विद्वांसः समागता आसन् यथा- प्रो. मृत्युञ्जयराथोडमहोदयः (एयिमस् रायपुर), डॉ. दीपेश्वरसिंहः (बाबा साहेब अम्बेडकर विश्वविद्यालय ), डॉ. लक्ष्मीकन्धन (मोरार्जी देसाई नेशनल इन्स्टीट्यूट्, देहली)। समापनसत्रे प्रो. के. कृष्णशर्ममहोदयः, भूतपूर्वविभागाध्यक्षः, मङ्गलूरुविश्वविद्यालयः मुख्यातिथित्वेन सभां सम्बोधितवान्।

**छात्रावासदिवसः-** प्रथमच्छात्रावासदिवसस्य आयोजनं केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे देवप्रयागे उत्साहेन अभवत्। एषः कार्यक्रमः दिवसद्वयं यावत् आचरितः। अस्मिन् काले परिसरेण शैक्षणिक-सांस्कृतिक-क्रीडा-प्रतियोगितानां आयोजनं कृतम्। परिसरे प्रथमच्छात्रावासदिवसस्य अवसरे क्रीडाप्रतियोगितासु छात्रैः उत्तमप्रदर्शनं कृतम्। कार्यक्रमस्य उद्घाटनं रविवासरे २२/०३/२०२५ तमे दिनाङ्के अभवत्। अस्मिन् कार्यक्रमे परिसरनिदेशकः प्रो.पी.वी.बी सुब्रह्मण्यम् महोदयः, प्रो. चन्द्रकला आर्. कौण्डीमहोदया च उपस्थिता आसीत्। कार्यक्रमस्य समापनं सोमवासरे २३/०३/२०२५ दिनाङ्के अभवत्। कार्यक्रमे वेदविभागस्य अध्यक्षः प्रो. मनोजकुमारमिश्रमहोदयः मुख्यातिथित्वेन आसीत्। अस्मिन् अवसरे श्री अंकुरवत्सः, डॉ. सोमेशबहुगुणा, डॉ. वीरेन्द्रबर्त्वालः, क्रीडाध्यापकः हिमांशुबिंजोला, श्रीमती राधे किशोरी, डॉ. रश्मिता, डॉ. सुमनरावतः, डॉ. पायलपाठकः इत्यादयः परिसरप्राध्यापकाः उपस्थिताः आसन्।




विश्वविद्यालयेन सञ्चालितः अभिनवपाठ्यक्रमः

## गुरुवायूर्-परिसरः



**न्यायसूत्रकार्यशालाः** - ०५/०२/२०२५ तमे दिनाङ्के केरलराज्यस्थ गुरुवायूर्-परिसरे अपराह्णे त्रिवादने शारदागुरुकुलम्, चेम्मण्टायां डा. प. नन्दकुमारवर्यस्य मार्गनिर्देशने, प्रो. के. के. षैन् वर्यस्य आध्यक्ष्ये, स्वामिहरिब्रह्मेन्द्रानन्दतीर्थानां मुख्यातिथ्ये, श्रीमती के. एन्. श्रीकलावर्यायाः विशिष्टातिथ्ये च दशदिनात्मिकायाः न्यायसूत्रकार्यशालायाः समापनसत्रं सुसम्पन्नम्। न केवलं न्यायच्छात्राणाम् अपि तु सर्वेषाम् अत्यन्तोपयोगी आसीत् एषा कार्यशाला। गौतममहर्षिणा प्रणीतानां न्यायसूत्राणां विषये सुष्ठु ज्ञानमवाप्तं छात्रैः।

**वसन्तपञ्चमीपूजा**- ०३/०२/२०२५ दिनाङ्के प्रातः एकादशवादने परिसरसभागारे अन्तर्जालमाध्यमेन कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यस्य आध्यक्षे वसन्तपञ्चमीपूजा आरब्धा के.सं.विश्वविद्यालयस्य गङ्गानाथझापरिसरे। पूजायाः परं वसन्तपञ्चमीमुद्दिश्य कुलपतेः मार्गदर्शनं परिसरनिदेशकेन सह सर्वैः प्राध्यापकैः छात्रैश्च प्राप्तम्। परिसरेऽपि वसन्तोत्सवस्य पूजा आयोजिता। छात्राः श्रद्धया पूजां कृत्वा सरस्वत्याः अनुग्रहणाय प्रार्थयन्।



**सम्भाषणशिविरम्**- सरलमानकसंस्कृतसमित्या समायोजितं दशदिनात्मकसंस्कृत-सम्भाषणशिबिरम् प्रातः दशवादने गुरुवायूरपरिसरस्य सभागारे संस्कृतसेवादक्षस्य श्रीमान् अरुणकुमारः एम् वर्यस्य मुख्यातिथ्ये, प्रो. के. के. षैन् वर्यस्य आध्यक्षे, डा. डि. वेणुगोपालराववर्यस्य संयोजने च एतस्य कार्यक्रमस्य उद्घाटनमभूत्। आचार्यच्छात्राः शिविरेऽस्मिन् भागं गृहीतवन्तः। फरवरीमासस्य १९ दिनाङ्के परिसरसभागारे सायंकाले सार्धचतुर्वादने कार्यक्रमस्यास्य समापनम् अभवत्। छात्राः सोत्साहं भागमगृह्णन्। संस्कृतभाषणे दक्षता, पटुता च साधिता।



**शैक्षणिकयात्रा**- गुरुवायूरपरिसरस्य ज्योतिषाविभागेन छात्राणां कृते २८/०२/२०२५ दिनाङ्कात् दिनत्रयं यावत् शैक्षणिकयात्रायाः आयोजनं कृतम्। परिसरीय ज्योतिष-विभागाध्यक्षस्य डा. श्रीनिवासन् पि.के. वर्यस्य आध्यक्षे प्राक्शास्त्री-द्वितीयवर्षादारभ्य आचार्यद्वितीयवर्षपर्यन्तम् आहत्य त्रयोविंशति(२३) ज्योतिषविभागच्छात्राः विभागीयैस्सह शैक्षिकयात्रार्थं शिरसिनगरस्थ सुमेरुज्योतिर्वननामकमेकं प्रसिद्धं स्थानमगच्छन्। यात्रायां छात्राः अध्यापकैः सह नानाप्राचीननवीनयन्त्राणाम् उपयोगेन आकाशः अवलोकितः। अनेनावलोकनेन छात्राः नक्षत्रपरिचयः, राशिचक्रपरिचयः, सौरमण्डलसम्बद्धान् विविधान् विषयान् च ज्ञातवन्तः।



**कार्यशाला**- गुरुवायूर्-परिसरे National Workshop on Capacity Building Programme on Manuscriptology केन्द्रीयसंस्कृतविश्वविद्यालयस्य एवं NMM (National Mission for Manuscripts), Ministry of Culture संस्थायाः सहयोगेन आयोजितायाः पञ्चदशदिनात्मिकायाः (०४/०३/२०२५ तः १८/०३/२०२५) कार्यशालायाः परिसरसभागारे परिसरनिदेशकस्य प्रो. के. के. षैन्वर्यस्य आध्यक्षे, प्रो. के. विश्वनाथन् वर्यस्य संयोजकत्वे उद्घाटनमभवत्। उद्घाटकः प्रो. जि. गङ्गाधरन्-नायर्-वर्यः आसीत्। कार्यशालायामस्याम् अनुभवशालिनः समागत्य मातृकासंरक्षण- शोधनपठनादि विषये बोधितवन्तः। एवं ब्राह्मी-शारदा-नन्दिनागरी-ग्रन्थ इति चतस्रः लिपयः पाठिताः। एवमेव समापनसत्रे NMM तः श्रीमति जिजुवर्या मुख्यातिथिरूपेण उपस्थिता आसीत्।

**NSS programmes** - NSS पक्षतः मासेऽस्मिन् बहवः कार्यक्रमाः सञ्जाताः। तेषु मुख्याः- सार्वजनिकस्थलेषु स्वच्छताकरणम्, होलिकादिनाचरणम्, १७ तः २४ पर्यन्तं मादकद्रव्यसमाजः, सुन्दरं जीवितम् इत्यादिविषयेषु जागरणकार्यक्रमः आयोजितः। परिसरसभागारे परिसरनिदेशकस्य प्रो. के. के. हर्षकुमारवर्यस्य आध्यक्षे नेत्रपरीक्षणशिबिरम् आयोजितम्। डा. सब् नाथ् ई. के (नेत्रचिकित्सकः) मुख्यवैद्यः आसीत्। एवं आलप्पाड्-आडाट्-परिवारस्वास्थ्यकेन्द्रयोः अनुभविनां नेत्रचिकित्सकानामपि साहाय्यमासीत्। शिबिरेऽस्मिन् छात्राणाम्, अध्यापकानामेवं परिसरसमीपस्थ जनानाञ्च दृष्टिपरीक्षणं, अपवर्तनं, नेत्ररोगाणां निर्धारणरूपञ्च नेत्रपरीक्षणमासीत्। २२ दिनाङ्के कस्तूरबा वृद्धाश्रमे सेवां कृतवन्तः।

## श्रीरणवीरपरिसरः

**राज्यस्तरीयशास्त्रीयस्पर्धा-** जनवरीमासस्य ११-१२ दिनांकयो: श्रीरणवीरपरिसरे राज्यस्तरीया शास्त्रीयस्पर्धा समनुष्ठिता। तत्र जम्मू-कश्मीरराज्यस्य विभिन्नेभ्य: शिक्षासंस्थानेभ्य: विद्यार्थिन: प्रतिभागीरूपेण समुपस्थिताः आसन्। प्रतियोगितायाः उद्घाटनसत्रम् ११/०१/ २०२५ दिनाङ्के प्रातः १०:३० वादने परिसरस्थिते वाणीविलाससभागारे जातम्। अस्मिन् उद्घाटनकार्यक्रमे मुख्यातिथि: जम्मूकश्मीर- राज्यस्य विधायक: श्रीमान् श्यामलालशर्ममहोदय:, विशिष्टातिथि: प्रो.रामकुमारशर्मवर्यः, सारस्वतातिथि: प्रो. विष्णुकान्तपाण्डेयवर्यः, अध्यक्ष: प्रो. श्रीधरमिश्रवर्यः च आसीत्। स्पर्धायां छात्राः स्वप्रतिभां प्रदर्श्य राष्ट्रस्तरीयस्पर्धायाः कृते चिताः। समापनसत्रे मुख्यातिथि: जम्मूकश्मीरराज्यस्य किस्तवाडजनपदस्य विधायिका सुश्रीशगुनपरिहारमहोदया आसीत्। सम्मानितातिथिरूपेण डा.रामदासशर्ममहोदयः उपस्थितः आसीत्। अवसरेऽस्मिन् संयोजक: डा. प्रमोदकुमारशुक्लवर्यः कार्यक्रमस्य सञ्चालनम् डा. सर्वेशत्रिपाठिना, स्वागतभाषणं प्रो. सतीशकुमारकपूरमहोदयेन, धन्यवादज्ञापनञ्च डा. प्रकाशचन्दयादवेन कृतम्।







**हेमन्तीयकार्यशाला-** १३.०१.२०२५ त: १९.०१.२०२५ दिनाङ्कपर्यन्तं परिसरे रघुवंशमहाकाव्यमाश्रित्य एकसप्ताहात्मिका हेमन्तीयकार्यशाला समनुष्ठिता। परिसरस्य साहित्यविभागस्य तत्त्वावधाने जातायामस्यां कार्यशालायां भारतस्य विभिन्नेभ्य: राज्येभ्य: ३० छात्रा: उपस्थिता: आसन्। हेमन्तीयकार्यशालायाः समापनसत्रे मुख्यातिथित्वेन के.सं.वि.वि. भोपालपरिसरस्य निदेशकः प्रो. रमाकान्तपाण्डेयवर्यः आनलाईन माध्यमेन समुपस्थितः आसीत्। तस्मिन् कार्यक्रमे प्रो. पाण्डेयवर्येण रघुवंशमहाकाव्यस्य व्यापकं महत्वं प्रतिपादितम्। तत्र परिसरस्य निदेशक: प्रो. श्रीधरमिश्रमहोदयः, सहनिदेशक: कार्यशालाया: संयोजकाश्च प्रो. सतीशकुमारकपूरवर्यः उपस्थित: आसीत्। सत्रस्य सञ्चालनम् तेजनाथपौडेलमहोदयेन, स्वागतम् डॉ. राजकुमारमिश्रवर्येण धन्यवादज्ञापनम् डॉ. सुमनचन्द्रपन्तेन च कृतम्।





**सरस्वतीपूजाकार्यक्रमः-** ०३/०२/२०२५तमे दिनाङ्के रणवीरपरिसरे श्रीपञ्चमीपर्वणः शुभावसरे मातुः सरस्वत्याः पूजनोत्सव: समनुष्ठितः। परिसरनिदेशकस्य मुख्योपस्थितौ अनुष्ठितेऽस्मिन् कार्यक्रमे परिसरस्य सहनिदेशक: विद्याशाखानामध्यक्षा: सर्वेऽपि अध्यापका: कर्मचारिणः छात्राश्च समुपस्थिताः आसन्। अनेन पूजनेन परिसरस्य कर्मकाण्डविभागस्य सर्वेऽपि छात्रा: प्रत्यक्षप्रयोगेण लाभान्विता: अभवन्।

**जागरूकता कार्यक्रमः-** ०७/०२/२०२५ तमे दिनाङ्के परिसरे भूमि जल प्रबन्धन और संरक्षण हेतु जागरूकता इत्याख्य: कार्यक्रमः अभवत्। अस्मिन् उपलक्ष्ये परिसरस्य मुख्यद्वारात् समीपस्थग्रामपर्यन्तं एका शोभायात्रापि समभूत्। परिसरस्य निदेशकवर्यस्य नेतृत्वे जातायामस्यां पदयात्रायां परिसरस्य अध्यापकाः, कर्मचारिणः, छात्राश्च समुपस्थिताः आसन्। तदनु परिसरस्य वाणीविलाससभागारे अमुमेव विषयमवलम्ब्य चर्चासत्रमप्यनुष्ठितम्। तत्र जम्मूकश्मीर- सर्वकारस्य विशिष्टपदाधिकारिण: समवेता: आसन्। कार्यक्रमे तेषामुद्बोधनेन परिसरस्य सर्वे सदस्या: लाभान्विता अभवन्। अयं कार्यक्रम: परिसरनिदेशकस्य प्रो. श्रीधरमिश्रमहोदयस्य आध्यक्ष्ये समभूत्। अनेन कार्यक्रमेण च छात्रा: कर्मचारिण: अध्यापकाश्च भूमिजलसंरक्षणे भारतसर्वकारपक्षत: के के कार्यक्रमा: अग्रसारिता: सर्वेषां भारतीयानाम् कीदृशम् कर्तव्यमस्तीति ज्ञानं प्राप्तवन्तः।



**आवासीयप्रशिक्षणवर्गः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणवीरपरिसरः तथा संस्कृतभारती जम्मूकश्मीरम् एतयोः संयुक्ततत्त्वावधाने दशदिवसात्मक: आवासीयप्रशिक्षणवर्गस्यायोजनमभवत्। तत्र १२९ त: अधिका: प्रतिभागिन: प्रशिक्षुरूपेण समवेताः आसन्। उद्घाटन- समारोहे विशिष्टातिथिरूपेण राष्ट्रपतिसम्मानितः परिसरस्य प्राचार्यचरः प्रो.प्रियतमचन्द्रशास्त्रीमहोदयः उपस्थितः आसीत्। मुख्यवक्तृरूपेण संस्कृतभारती उत्तरक्षेत्रस्य संगठनमन्त्री श्रीमान् नरेन्द्रकुमार: आसीत्। अध्यक्षता परिसरनिदेशकस्य प्रो. श्रीधरमिश्रमहोदयस्यासीत्। प्रशिक्षणवर्गस्यानन्तरं सर्वे प्रतिभागिन: छात्रा: संस्कृतभाषायां शिबिरादिसंचालनाय पाठनाय च सक्षमाः अभवन्।



**कौशलनिमार्णकार्यक्रमः-** फरवरीमासस्य २०-२१ दिनांकयो: श्रीरणवीरपरिसरे कौशलनिमार्णसत्रम् इति विषयिणी गोष्ठी समनुष्ठिता। तस्या: गोष्ठ्या: उद्घाटनकार्यक्रम- सत्रम् परिसरस्य मम्मटसभागारे जातम्। अस्य उद्घाटनसत्रस्य मुख्यातिथि: भोपाल- परिसरस्य निदेशक: प्रो. रमाकान्तपाण्डेय महोदय: आसीत्। विशिष्टातिथिरूपेण जम्मूविश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्ष: प्रो रामबहादुरशुक्लमहोदय: आसीत्। सत्रमेतत् परिसरनिदेशकस्य प्रो. श्रीधरमिश्रमहोदयस्य आध्यक्षे जातम्। तस्मिन् अवसरे परिसरस्य सहनिदेशक: प्रो सतीशकपूरमहोदय: परिसरस्य अन्ये अध्यापका: छात्राश्च समुपस्थिताः आसन्। कौशल-विकासनिर्माणकार्यक्रमे परिसरस्य-अध्यापकाः छात्राश्च विदुषां व्याख्यानेन लाभान्विताः अभवन् तथास्मिन् सप्तसिन्धुक्षेत्रे संस्कृतमनीषिणां कथमवदानमासीत् अत्र के के ख्यातनामान: विद्वांस: आसन्नित्यपि ज्ञातवन्त:।



**आपदाप्रबन्धनकार्यक्रमः -** के.सं.वि.वि. श्रीरणबीरपरिसरः, कोटभलवाल जम्मू मध्ये एनडीआरएफ टीम द्वारा आपदाकाले उद्धार: कथं करणीय: इत्यस्य प्रर्दशनमभवत्। सप्तदिवसीयस्य एनएसएस शिबिरस्य पञ्चमे दिवसे अयं कार्यक्रमः आयोजितः। अस्य कार्यक्रमस्य मुख्यम् उद्देश्यम् आपदाप्रबन्धनस्य प्रति जागरूकतां जनयितुं छात्रान् आवश्य-उद्धारप्रविधिषु प्रशिक्षितुं च आसीत्। भूकम्पः, जलप्रलयः, अग्निः इत्यादिषु आपात्कालीनस्थितिश्च शीघ्रं प्रभावी च प्रतिक्रियां दातुं विशेषतया अयं सत्रः आयोजितः आसीत्। अस्य कार्यक्रमस्य संयोजक: NSS इत्यस्य समन्वयक: डॉ. गोपालवर्मावर्यः सहसंयोजक: च एनएसएस कार्यक्रमः अधिकारी श्री मनिन्दरसिंहः आसीत्। तत्र उद्धारप्रदर्शने १८० छात्राः सक्रियरूपेण भागं गृहीतवन्तः। विश्वविद्यालयस्य शिक्षकाः, कर्मचारिण: अपि कार्यक्रमे उत्साहेन भागं गृहीतवन्तः। आपदाप्रबन्धनप्रविधिषु रुचिं च दर्शितवन्तः। कार्यक्रमे परिसरस्य सहनिदेशकः प्रो.सतीशकपूरः स्वयंसेवकान् सम्बोधयन् आपदाप्रबन्धनस्य समाजसेवायाश्च महत्त्व बलं दत्तवान्। न केवलं शिक्षायां अपितु समाजसेवायां, आपत्कालीनस्थितौ च युवान: सक्रियभूमिकां निर्वहणीया इति अवदन्।

**रक्तदानशिबिरम्-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरणबीरपरिसरे राष्ट्रीयसेवायोजनान्तर्गते रक्तदानशिबिरस्य आयोजनम् अभवत्। अस्मिन् अभियाने छात्राः कर्मचारिणश्च उत्साहेन भागं गृहीतवन्तः। येन प्रायः पञ्चाशत् यूनिट् रक्तदानं जातम्। परिसरनिदेशकस्य प्रो. श्रीधरमिश्रस्य निर्देशने जातस्यास्य कार्यक्रमस्य समन्वयकः डॉ. गोपालवर्मा एवं सहसंयोजक: NSS कार्यक्रमाधिकारी श्रीमनिन्दरसिंहः च आसीत्। सहनिदेशक: प्रो. सतीशकुमारकपूरः शिविरे उपस्थितः भूत्वा रक्तदातृणां प्रशंसाम् अकरोत्। समाजे तेषां योगदानं महत्त्वपूर्णतां च वर्णितवान्। एतत् अभियानं सफलीकर्तुं जम्मूनगरस्य सर्वकारीयचिकित्सादलमपि समागत आसीत्। शासकीय- चिकित्सामहाविद्यालयस्य (जीएमसी) विशेषचिकित्सादलेन सह डॉ. अंशुलशर्मण: नेतृत्वे आवश्यक- चिकित्सा- प्रोटोकॉल-अनुसरणं कृत्वा रक्तदानप्रक्रियायाः सुचारुतया संचालनं कृतम्। अस्मिन् रक्तदानशिबिरे आदर्शवाक्यस्य "न अहं अपितु भवन्तः" इति भावनां मूर्तरूपं धारयति। एषः उपक्रमः बहुधा प्रशंसितः। मानवसेवायाः सामाजिकमुत्तरदायित्वं प्रति परिसरस्य प्रतिबद्धतां सुदृढां करोति।





**छात्रावासदिवसः-** श्रीरणवीरपरिसरे छात्रावासदिवसोत्सव: समनुष्ठित:। परिसरनिदेशकस्य प्रो. श्रीधरमिश्रवर्यस्य, सहनिदेशकस्य प्रो. सतीशकुमारकपूरवर्यस्यनिर्देशने जातस्यास्य कार्यक्रमस्य समन्वयक: छात्रावासप्रतिपालकः डा. गोपालवर्मा सहसमन्वयक: डा. सुमनचन्द्रपन्त: आसीत्। तस्मिन् कार्यक्रमे परिसरीयछात्रावासेस्थितैः छात्रैः भारतस्य विभिन्नराज्यानां प्रतिनिधित्वं विधाय तत्तद्राज्यानां वैशिष्ट्यं, नृत्य-गायनादिमाध्यमेन सांस्कृतिकं महत्त्वम्, प्रसिद्धानि भोजनव्यञ्जनादीनि प्रदर्शितानि।

## श्रीसदाशिवपरिसरः



**अङ्कीयछात्नोपस्थितिविषयकजागरूकताकार्यक्रमः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य सदाशिवपरिसर-च्छात्नाणाम् अनुशासनाय मुख्यालयतः क्रियान्वितस्य अङ्कीयछात्नोपस्थितिविषयकजागरूकता कार्यक्रमस्य परिसरनिदेशकस्य प्रो. वनमालीबिश्वालवर्यस्य आध्यक्षे जनवरीमासस्य प्रथमे दिनाङ्के समायोजनमभवत्। कार्यक्रमस्यास्य समन्वयकौ सङ्गणकविभागस्य डॉ. सुशान्तकुमारशतपथी, डॉ.विश्वनाथमिश्रमहोदयौ आस्ताम्। छात्नेभ्य उपस्थितिविषये बोधः, तथैव शिक्षकाणां कृते प्राविधिकमार्गदर्शनपुरस्सरं विवरणं प्रविधिज्ञः डॉ. दिलीपपण्डामहोदयः अददात्। निदेशकानामाश्वासनेन छात्नाः उपस्थितिविषय- कपारदर्शितामज्ञास्यन्।



**अखिलभारतरूपकमहोत्सवः-** अखिलभारतरूपकमहोत्सवस्य चतुर्थवलयस्य वैभवोपेतं समाचरणं सदाशिवपरिसरे सञ्जातम्। महोत्सवोऽयं ०८/०१/२०२५तमे दिनाङ्के मुख्यातिथिः श्रीमान् शिवाशीष-खुण्टिया, विशिष्टातिथिः श्रीमान् मनोजमिश्रः, अध्यक्षः प्रो.वनमालीबिश्वालः इत्येतेषां करकमलाभ्यां उद्घाटनसमारम्भाय संसिद्धः जातः। भिन्नस्थानेभ्यः नाट्यप्रस्तुतिं कर्तुं समागतेषु एकलव्यपरिसरः अगरतला, कालियाचकबिक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः पश्चिमबंगालः, श्री राधामाधव-आदर्शसंस्कृतमहाविद्यालयः बिहारः, मणिपुरम्, श्री रामजीमेहता-आदर्शसंस्कृतमहाविद्यालयः,बिहारः, श्रीरामसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, बिहारः, लक्ष्मीदेवीश्रोफ-आदर्शसंस्कृतमहाविद्यालयः झारखण्डः, राजकुमारीगणेशशर्मासंस्कृतविद्यापीठम्, दरभङ्गा बिहारः, श्रीसदाशिवपरिसरः पुरी इति आहत्य अष्टौ भागग्रहीतारः आसन्। क्रमशः दिनत्नयं यावत् महोत्सवेऽस्मिन् सर्वेऽपि छात्नाः महता उत्साहेन प्रदर्शनमकुर्वन्। १० दिनाङ्के मुख्यातिथिः श्रीमान् सम्बित्पात्नः लोकसभासांसदः पुरी, विशिष्टातिथिः प्रो. सुकान्तसेनापतिः कुलपतिः श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, चलच्चित्ननिदेशकः अश्रुमोचनमहान्ति इत्येतेषां सान्निध्ये समारोपकार्यक्रमः समायोजितः। सर्वोत्कृष्टप्रदर्शनं कृतवते श्रीसदाशिवपरिसराय प्रथमस्थानमलभत। द्वितीयस्थानं कालियाचकबिक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः, पश्चिमबंगालः, तृतीयस्थानं एकलव्यपरिसरः अगरतला इत्येताभ्यां प्राप्तम्। अवधेयं यत् सर्वेऽपि कार्यक्रमाः सद्यस्कमाध्यमेन सामाजिकमाध्यमेषु प्रसारिताः। कार्यक्रमस्य संयोजकः डॉ.सुब्रतषडङ्गी आसीत्।




**युवदिवसपालनम् –** विवेकानन्दजयंतीमुपलक्ष्य राष्ट्रीययुवादिवसपालनावसरे श्रीसदाशिवपरिसरः पुरी, जवाहरयुवाकेन्द्रं तथा च विवेकानन्दकेन्द्रम् पुरी इत्यस्मात् छात्नाः आचार्याश्च समुद्रतटे सामूहिकसूर्यनमस्कारः तथा योगाभ्यासमकुर्वन्। पश्चात् विविधप्रतियोगितासु भागं गृहीत्वा पुरस्कृताः च अभवन्। विवेकानन्दस्य शिक्षा, चरित्नं प्रति युवकानां जागरणम् ।



**राज्यस्तरीया शास्त्रीयस्पर्धा –** परिसरे राज्यस्तरीयशास्त्रीयस्पर्धायाः आयोजनं प्रो. वनमाली बिश्वालवर्यस्य आध्यक्षे २२/०१/२०२५ दिनाङ्के समभवत्। उत्कलराज्यस्तरीयशास्त्रीयस्पर्धायाम् अस्याम् उद्घाटनसत्ने विभिन्नमहाविद्यालयगुरुकुलयोः १५० छात्नाः प्रायः अष्टादशमहाविद्यालयेभ्यः दशजनपदेभ्यः विभिन्नासु शास्त्नप्रतियोगितासु भागं ग्रहीतुं समागताः आसन्। कार्यक्रमोऽयं प्रो. गणपतिशुक्लः, डॉ.नन्दीघोषः च एताभ्यां सुष्ठु सञ्चालितः। प्रो. सदानन्ददीक्षितवर्यः मुख्यातिथि- रूपेण समागतः आसीत् ।




**NEP-२०२० पञ्चदिवसीया कार्यशाला–** परिसरस्थशिक्षकाणां जागरुकतासम्पादनाय विशिष्टकार्यशालायाः आयोजनमभवत्। राष्ट्रियशिक्षानीतेः अवगाहनार्थं तद्गतभिन्नांशानां सूक्ष्मनिरीक्षणार्थं कुलपतिवर्याणां आग्रहेण कार्यशालेऽयं भिन्नविभागस्तरे समायोजिता आसीत्। मान्यनिदेशकेन प्रो. वनमालीबिश्वालवर्येण तत्न सर्वविभागानां परिशीलनं विहितं उपदिष्टञ्च यत् नीतेरस्याः भिन्नकोणैः समीक्षणमावश्यकमनिवार्यञ्च। तदनु प्राचार्याः अन्य अध्यापकगणैः सह सक्रियभागग्रहणमकुर्वन् ।



**प्रशिक्षणवर्गः-** शिक्षाशास्त्नविद्याशाखापक्षतः द्वितीयसत्नार्द्धच्छात्नाणां पाठ्यचर्यान्तर्गतेन फरवरीमासस्य ८ दिनाङ्कतः १४ दिनाङ्क पर्यन्तं सप्तदिवसीयः स्काउट एवं गाईड प्रशिक्षणवर्गः समायोजितः। उद्घाटनसत्ने निदेशकः प्रो. वनमालीबिश्वालवर्यः, सहनिदेशकः अध्यक्षः च प्रो. विजयपालकछवाहवर्यः, समन्वयिका, प्रो. निर्मलापाणिग्राहीवर्या, संयोजकौ डॉ.भाग्यसिंहगुर्जरः, डॉ.सागरिकानन्दः च तदितरे शिक्षकाः छात्नाश्च समुपस्थिताः आसन्। भारत स्काउट एवं गाईड द्वारा इदं प्रशिक्षणं उत्कृष्टरूपेण समायोजितम्। समेऽपि छात्नाः अनुशासनस्य क्रमशिक्षणस्य देशभक्तिभावस्य च विकासं कृतवन्तः।



**हैमन्तीया कार्यशाला-** श्रीसदाशिवपरिसरस्य साहित्यविभागपक्षतः सप्तदिवसीया हैमन्तीयकार्यशाला समायोजिता। कार्यशालायाः प्रमुखविषयः "कथामुखानन्तरं पूर्वभागस्याध्ययनम्" इति। विषयेऽस्मिन् आचार्यरामकुमारशर्मवर्येण आचार्यसूर्य- मणिरथवर्येणश्च सुष्ठु व्याख्यातम्। विभिन्नपरिसरेभ्यः प्रायः ५० छात्राः भागमगृह्णन्। सर्वाणि सत्राणि ज्ञानविकासाय परिलक्षितानि आसन्। समेऽपि विद्यावारिधिच्छात्राः अपि कार्यशालायामस्यां सक्रियरूपेण भागं गृहीतवन्तः। निदेशकवर्यस्य प्रो.वनमालीबिश्वालवर्यस्य मार्गदर्शनेन तथा च प्रो. सुशान्तकुमारराजवर्यस्य प्रेरणया कार्यशालेऽयं साफल्यङ्गता। साहित्यविभागस्य सर्वैः शास्त्रि-आचार्य-विद्यावारिधिच्छात्रैः सम्पूर्ण कादम्बर्याः अध्ययनं सम्पादितम्।

**ग्लोरीमहोत्सवः-** प्रतिवर्षमिव ऐषमः ग्लोरीमहोत्सवस्य आयोजनं महता वैभवेन सञ्जातम्। राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः पुरी तथा च अन्य सहयोगिसंस्थाभिः अस्याचरणं क्रियते। विभिन्न शैक्षिक-सांस्कृतिक- स्पर्धासु परिसरच्छात्राः भागमगृह्णन् पुरस्कारभाजाः च अभवन्। तत्तत्छास्त्राणां शिक्षकाणां तत्र मार्गदर्शनं प्राप्य छात्राः लाभान्विताः जाताः। कार्यक्रमेऽस्मिन् ३०० छात्राः भागम् अगृह्णन्। ऐषमः ग्लोरीक्वीन् विजेत्री राष्ट्रियसंस्कृतविश्वविद्यालयस्य छात्रा आसीत् इति हर्षप्रमोदविषयः। अस्मच्छात्रैरपि त्र्यधिकपुरस्काराः प्राप्ताः निदेशकेन अभिनन्दिताश्च ते इति दिक्।



**राष्ट्रियसङ्गोष्ठी-** परिसरीयपुराणेतिहासविभागद्वारा एकदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। अवसरेऽस्मिन् विभागाध्यक्षा प्रो. मिनतीरथवर्या, निदेशकः प्रो.वनमालीबिश्वालवर्यः तदितरविभागीयाध्यापकाः छात्राश्च समुपस्थिताः आसन्। कार्यक्रमेऽस्मिन् मुख्यवक्तृरूपेण प्रो. जयमाणिक्यशास्त्री श्री जगन्नाथसंस्कृतविश्वविद्यालयः पुरी, मुख्यातिथिरूपेण श्रीमती सुचरिताजेनामहोदया संकल्प फाउण्डेशन पुरी च आस्ताम्। सङ्गोष्ठ्याः विषयः "काशी-काञ्चीसेतुरूपः महर्षिरगस्त्यः" इति। अनया राष्ट्रियसंगोष्ठ्या छात्रैः अखण्डभारतनिर्माणे अगस्त्यमहर्षेः योगदानस्य अवबोधः जातः ।

**अन्ताराष्ट्रियमातृभाषादिवसः –** श्रीसदाशिवपरिसरस्य जयदेवसभागारे अन्ताराष्ट्रियमातृभाषादिवसः २१/२/२०२५तमे दिनाङ्के समाचरितः। विभिन्न-भाषाभाषिणः परिसरप्राध्यापकाः, छात्राः, शैक्षणिकेतरकर्मचारिणश्च स्वमातृभाषायां स्वविचारान् प्राकटयन्। अवसरेऽस्मिन् माननीयनिदेशकः प्रो. बनमालीबिश्वालवर्यः मातृभाषासंरक्षणसंवर्धनविषये उद्बोधयन्। सहनिदेशकवर्यः प्रो. विजयपालकछवाहवर्यः अपि मातृभाषां प्रति गौरवप्रदर्शनस्य भावं प्राकटयत्। कार्यक्रमस्य सञ्चालनं डॉ.स्वागतिकामहोन्तिवर्या, डॉ.विश्वनाथमिश्रवर्यः च कृतवन्तौ। धन्यवाद-समर्पणेन कार्यक्रमः समाप्तिङ्गतः।



**रक्तदानशिबिरम्-** संकल्पफाउण्डेशन इति संस्थया सह मिलित्वा केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीसदाशिवपरिसरः मार्चमासस्य प्रथमे दिनाङ्के रक्तदानशिबिरम् समायोजयत्। परिसरनिदेशकः प्रो.बनमालिबिश्वालमहोदयः कार्यक्रमस्य शुभारम्भं कृतवान्। परिसरस्य अध्यापकाः अध्यापिकाः छात्राः च रक्तदानशिबिरे भागं गृहीत्वा रक्तदानं कृतवन्तः। संकल्पफाउण्डेशनसंस्थायाः स्वेच्छासेवकानाम् अभिनन्दनं कृतवान् परिसरनिदेशकः। समाजहिताय स्वस्य रक्तदानेन छात्राः समाजं प्रति स्वकर्तव्यं ज्ञातवन्तः



**विशिष्टव्याख्यानम्-** मार्चमासस्य तृतीयदिनाङ्के श्रीसदाशिवपरिसरस्य जयदेवसभागारे भारतीयज्ञानपरम्परा इति विषयम् आधारीकृत्य एकं विशिष्टव्याख्यानम् आयोजितम्। कार्यक्रमेऽस्मिन् व्याख्यातृरूपेण भारतीय-हिन्दीपरिषदः सभापतिः लखनऊविश्वविद्यालयस्य प्रो.पवन-अग्रवालवर्यः उपस्थितः आसीत्। कार्यक्रमस्य आध्यक्ष्यमवहत् श्रीसदाशिवपरिसरस्य निदेशकः प्रो.बनमालिबिश्वालवर्यः। कार्यक्रमे उपस्थिता आसन् सहनिदेशकः प्रो.विजयपालकच्छवाहः, कार्यक्रमसंयोजकः डॉ.शक्तिप्रसादद्विवेदी, परिसराचार्याः, छात्राः च।

**स्वास्थ्यपरीक्षणम्-** मार्चमासस्य तृतीये दिनाङ्के "स्वास्थ्यं तथा फिटनेस आकलनपरीक्षणं च- २०२५" सफलतया सम्पन्नम्। अस्माकं परिसरनिदेशकस्य प्रो.बनमालिबिश्वालवर्यस्य आध्यक्ष्ये परिसरक्रीडा अध्यापकस्य डॉ. गौतमचौधुरिवर्यस्य संयोजनया कार्यक्रमः अयं सञ्जातः। अस्माकं छात्राणां संकायानां च मध्ये स्वास्थ्यजागरूकतायाः मूल्याङ्कनं, प्रवर्धनं च कर्तुम् एषः कार्यक्रमः महान् अवसरः आसीत्। अस्मिन् कार्यक्रमे सर्वेषां समर्पितानां संकायसदस्यानाम् उपस्थितिः आसीत् ।



**एकदिवसीया राष्ट्रियसंगोष्ठी-** मार्चमासस्य द्वितीयदिनाङ्के श्रीसदाशिवपरिसरे एकदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। यस्याः विषयः आसीत् एकं भारतम् एकं निर्वाचनम् इति । श्रीश्रीक्षेत्रसूचनासंवादपत्रस्य तृतीयस्वनक्षत्रोत्सवावसरे अयं कार्यक्रमः आयोजितः। प्रो.हरेकृष्णशतपथी अस्य कार्यक्रमस्य अध्यक्षताम् अकरोत्। श्रीश्रीक्षेत्रसूचनासंवादपत्रस्य सम्पादकः श्रीराजेशकुमारमहान्तिः कार्यक्रमस्य संचालनामकरोत्। अस्मिन् कार्यक्रमे राज्यस्य विविधराजनैतिकदलानां प्रतिनिधयः, पत्रकाराः, अध्यापकाः, अधिवक्तारः च समुपस्थिताः आसन्। अस्य कार्यक्रमस्य समारोपसत्रे ओड़िआविश्वविद्यालयस्य कुलपतिः प्रो. सबिताप्रधानः मुख्यातिथिरूपेण उपस्थिता आसीत्। मुख्यवक्तृरूपेण प्राक्तनः पुरीविधायकः श्रीजयन्तकुमारषडङ्गी, सम्मानितातिथित्वेन परिसरस्य निदेशकः प्रो.बनमालिबिश्वालः समुपस्थितः आसीत्।

**योगप्रशिक्षणम्-** मार्चमासस्य ५-६ दिनाङ्कयोः श्रीसदाशिवपरिसरस्य क्रीडासभागारे शिक्षाशास्त्रिछात्राणां द्विदिवसीयं योगप्रशिक्षणम् आयोजितम्। परिसरस्य प्रभारीनिदेशकः प्रो. ललितकुमार साहूवर्यः दीपं प्रज्वाल्य कार्यक्रमस्य शुभारम्भं कृतवान्। परिसरस्य योगाचार्यः डॉ. प्रेमप्रकाशपाण्डेयः अस्मिन् कार्यक्रमे योगप्रशिक्षकत्वेन भागम् अग्रहीत्। उद्घाटनकार्यक्रमे परिसरसहनिदेशकः शिक्षाशास्त्रविभागाध्यक्षः प्रो. विजयपालकच्छवाहवर्यः उपस्थितः आसीत्। सत्रेऽस्मिन् २२० छात्राः योगाभ्यासम् अकुर्वन्।

**विकसितभारतसन्दर्भे युवसंसदः-** ०७/०३/२०२५ दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीसदाशिवपरिसरे भारतसर्वकारस्य युवाकार्यक्रीडामन्त्रालयस्य निर्देशनेन एकः युवसंसदः आयोजनमभवत्। कार्यक्रमे विकसितभारतस्य २०४७ कृते यूनां योगदानं इत्यस्मिन् विषये परिसरच्छात्राः स्वस्वमतम् उपस्थापितवन्तः। परिसरस्य प्रभारीनिदेशकः प्रो. ललितकुमारसाहुवर्यः दीपप्रज्वालनेन कार्यक्रमस्य उद्घाटनम् अकरोत्। प्रारम्भे कार्यक्रमसंयोजकः डॉ. रमाकान्तसावर्यः कार्यक्रमस्य प्रस्तावम् अकरोत्। परिसरक्रीडाध्यापकः डॉ. गौतमचौधरी विकसित-भारतस्य लक्ष्यं प्राप्तुं छात्रान् प्रैरयत्। साहित्यविभागस्य प्रमुखः प्रो.सुशांतकुमारराजः छात्रान् आलस्यं त्यक्त्वा देशस्य विकासाय कार्यं कर्तुं प्रोत्साहितवान्। अन्ते कार्यक्रमस्य सहनिर्देशकः प्रो.विजयपालकछवाहावर्यः कृतज्ञतां प्राकटयन् युवानः भारतस्य वर्तमानस्य भविष्यस्य च निर्मातारः सन्ति इति प्रबोधितवान्। सभायाः संचालनं शिक्षाविभागस्य अध्यापकः डॉ. अवस्थीशैलेशः अकरोत्।

**होलिकोत्सवः-** परिसरे १४ दिनाङ्के महता वैभवेन उल्लासपूर्वकञ्च होलिकोत्सवस्य पालनमभवत्। निदेशकवर्येण अपि छात्राणामुत्साहवर्धनं कृतम्। तत्र होलिकोत्सवपालनस्य सन्दर्भं पुरस्कृत्य महोदयेन सर्वेपि आप्लाविताः। ततः भिन्नवर्णैः परस्परं छात्राः उत्सवस्य आचरणं अकुर्वन्। परिसरस्थ विभिन्न आचार्याः सहनिदेशकवर्यः प्रो. विजयपालकछवाहावर्यः, प्रो.मखलेशकुमारवर्यः, अन्ये च अध्यापकाः समुपस्थाय छात्राणां प्रोत्साहनं कृतवन्तः। प्रतिवर्षमिव परिसरपक्षतः सर्वेभ्यः मिष्टान्नव्यवस्था अपि आसीत्। सायंकाले बालकछात्रावासे विशेषकार्यक्रमः आयोजितः भोजनव्यवस्था च कृता।

**छात्रावासदिवसोत्सवः -** विश्वविद्यालयस्य अन्तेवासिनां छात्राणां प्रेरणायै सौहार्दभावनायाः विकासाय च मार्चमासस्य २६ दिनाङ्कतः २८ दिनाङ्कं यावत् त्रिदिवसीयः छात्रावासदिवसोत्सवः महता वैभवेन पालितः। कुलपतिः प्रो. श्रीनिवासवरखेडिवर्यस्य निर्देशेन आयोजितेऽस्मिन् कार्यक्रमे छात्राणां नानास्पर्धाः समायोजिताः। परिसरनिदेशकः प्रो.बनमालिबिश्वालः ध्वजोत्तलनं कृत्वा कार्यक्रमस्य शुभारम्भम् अकरोत्। कार्यक्रमस्य समारोपसत्रे विश्वविद्यालयस्य छात्रकल्याणाध्यक्षः तथा च शैक्षणिकसंकायाध्यक्षः प्रो.मदनमोहनझावर्यः तेन सहसंकायप्रमुखः प्रो.एल्.आर्.नारायणसिंहवर्यः उपस्थितौ आस्ताम्। वाल्मीकिच्छात्रावासस्य तत्त्वावधानिनः प्रो.मखलेशकुमारस्य डॉ.अजयानन्दसाहूवर्यस्य च संयोजनया कार्यक्रमः सफलीभूतः।

**क्रीडोत्सवः-** श्रीसदाशिवपरिसरस्य शिक्षाशास्त्रविद्याशाखायां दिनद्वयस्य क्रीडोत्सवस्य पालनं उत्साहपूर्वकं जातम्। उत्सवेऽस्मिन् विभागीय शिक्षाशास्त्रि-शिक्षाचार्यच्छात्राणां कृते विभिन्नस्पर्धायाः आयोजनं कृतम्। निदेशकस्य प्रो. वनमालीबिश्वालवर्यस्य करकमलाभ्यां वैभवपूर्णमुद्घाटनं क्रीडोत्सवस्य आरम्भश्च सञ्जातः। सहनिदेशकवर्यः विभागस्य अध्यक्षः प्रो. विजयपालकछवाहवर्यस्य मार्गदर्शने अन्य आचार्याणां सहयोगेन च विभिन्नस्पर्धाः समायोजिताः अभवन्। संयोजकत्वेन डॉ. स्नेहलतामिश्रः, डॉ. महेशकुमारपाणिग्राही, डॉ. तन्मयमण्डलः आसन्। दिनद्वयस्य उत्सवेस्मिन् क्रिकेट् क्रीडा, बालीबाल, बैटमिण्टन्, चेस्, कैरम, कुश्ती, कबड्डी इत्यादि बालकानां बालिकानां च पृथक् स्पर्धाः आसन्। पुनश्च शिक्षाशास्त्रिप्रथमवर्ष-द्वितीयवर्षयोः मध्ये तथा च शिक्षाशास्त्रि-शिक्षाचार्यछात्राणां च परस्पर स्पर्धानामायोजनं अतीव रोमाञ्चकम् अभवत्। छात्राः सक्रियरूपेण च भागमगृह्णन्।

**विश्वसंस्कृतसम्मेलनम्-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य लोकभाषाप्रचारसमितेः च संयुक्त- तत्वावधानेन सहयोगेन श्रीसदाशिवपरिसरे पुर्यां त्रिदिवसीयं विश्वसंस्कृतसम्मेलनम् आयोजितम्। सम्मेलनेऽस्मिन् उद्घाटनकार्यक्रमे मुख्यातिथित्वेन माता-अमृतानन्दमयि- आश्रमस्य स्वामिनी सुविधामृतप्राणा, विशिष्टातिथित्वेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः, लोकसभायाः सांसदः डा. संबितपात्रः, मुख्यवक्तृत्वेन चिन्मयविश्वविद्यालयस्य प्राक्तनाचार्यः प्रो. वि.माधवन्, लोकभाषाप्रचार- समितेः राष्ट्रियः अध्यक्षः श्री सदानन्ददीक्षितः आसन्। अस्मिन् सम्मेलने देशविदेशतः शताधिकाः संस्कृतविद्वांसः उपस्थाय स्वीयं पत्रवाचनं कृतवन्तः।



## वेदव्यासपरिसरः

**व्याख्यानम्-** वेदव्यासपरिसरे साहित्यविद्याशाखाभारतीयदार्शनिकानुसन्धानपरिषद् इत्यनयोः संयुक्ततत्त्वावधाने अन्तर्जालमाध्यमेन प्रमाणमीमांसाविषये व्याख्यानम् १५/०१/२०२५तमे दिनाङ्के आयोजितमभूत्। तत्र डॉ. बिपिनबिहारीदुबेवर्यः मुख्यवक्तृरूपेण उपस्थितः आसीत्। अस्य अध्यक्षतां परिसरनिदेशकः प्रो. सत्यमकुमारीवर्या अकरोत्। अस्मिन् साहित्यविद्याशाखायाः समेऽपि आचार्याः छात्राश्च उपस्थिताः आसन्।




**क्रीडाप्रशिक्षणकार्यक्रमः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेदव्यासपरिसरे विश्वविद्यालय-क्रीडोत्कृष्टकेन्द्रपक्षतः छात्राणां कृते क्रीडाप्रशिक्षणकार्यक्रमस्य प्रारम्भः अभवत्। पञ्चदशदिनात्मके प्रशिक्षणकार्यक्रमे त्रयाणां परिसराणां तत्र प्रथमचक्रे श्रीरणवीरपरिसरः, श्रीरघुनाथकीर्तिपरिसरः, वेदव्यासपरिसरश्च प्रतिभागीरूपेण ९० छात्राः उपस्थिताः आसन्। अस्य प्रशिक्षणकार्यक्रमस्य उद्घाटनसत्रे अध्यक्षतां परिसरनिदेशकः प्रो. सत्यमकुमारीवर्या अकरोत्। मुख्यातिथिरूपेण प्रो. अशोकचन्द्रगौडः उपस्थितः आसीत्। अस्य संयोजकः डॉ. संजयकुमारः आसीत्।

**राष्ट्रिय-व्याकरणशोध सङ्गोष्ठी -** २२/०१/२०२५ दिनांके वेदव्यासपरिसरे व्याकरणविद्याशाखायाः भारतीयदार्शनिकानुसन्धानपरिषदः च संयुक्ताश्रयेन भौतिकरूपेण अन्तर्जालमाध्यमेन च "नवाह्निक व्याकरणमहाभाष्य कोशः" इति विषयमधिकृत्य शोधसङ्गोष्ठी अभूत्। तत्र प्रो. अशोकचन्द्रगौडः (सेवानिवृत्ताचार्यः, व्याकरणविद्याशाखाध्यक्षः) प्रो. बृहस्पतिमिश्रः (हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः) मुख्यवक्तृरूपेण उपस्थितः आसीत्। सङ्गोष्ठ्यामस्यां व्याकरणविद्याशाखायाः छात्रैः शोभनाः प्रस्तुतयः कृताः। अस्य अध्यक्षतां परिसरनिदेशकः प्रो. सत्यमकुमारीवर्या अकरोत्। अस्मिन् परिसरस्य आचार्याः छात्राश्च उपस्थिताः आसन्।

**युवदिवसः-** १५/०१/२०२५ दिनाङ्के वेदव्यासपरिसरे युवदिवसस्य आयोजनमभवत्। कार्यक्रमोऽयं राष्ट्रियसेवायोजनायाः सौजन्येन सम्पन्नोऽभूत्। अस्य अध्यक्षतां परिसरनिदेशकः प्रो. सत्यमकुमारीवर्या अकरोत्। अस्मिन् मुख्यवक्तृरूपेण प्रो. शीशरामः उपस्थितः आसीत्। अयं कार्यक्रमः श्रीपंकजवर्यस्य संयोजकत्वे आयोजितोऽभूत्।

**राज्यस्तरीयशास्त्रीयस्पर्धा-** जनवरीमासस्य १८-१९ दिनाङ्कयोः वेदव्यासपरिसरे राज्यस्तरीयशास्त्रीयस्पर्धायाः आयोजनमभूत्। अस्यां स्पर्धायां वेदव्यासपरिसरस्य छात्राः विविधस्पर्धासु प्रतिभागम् अकुर्वन्। तत्र परिसरस्य पञ्चदश छात्राः राज्यस्तरे प्रथमं स्थानं प्राप्य अखिलभारतीयशास्त्रीयस्पर्धायै चित्ताः अभूवन्। अनेन परिसरस्य गौरवं वर्धितं एतदर्थं परिसरनिदेशकः प्रो.सत्यमकुमारीवर्या एतान् छात्रान् शुभकामानाभिः अपोषयत्।



**महाकुम्भयात्रा-** प्रयागराजे जायमाने महाकुम्भपर्वणि वेदव्यासपरिसरात् ४५ छात्राः त्रिभिः मार्गदर्शकैः सह २०-२१ जनवरी २०२५ दिनाङ्केषु कुम्भक्षेत्रे स्नानं भ्रमणं चाकुर्वन्। अत्र विशेषः महापुरुषाणाम् आशीर्वादः आसीत्। अयं सुखदकालः कुलगुरुः आचार्यः श्रीनिवासवरखेड़ीवर्यस्य दूरगामीचिन्तनेन प्राप्तः आसीत्।




**संस्कृतसम्भाषणशिबिरम्-** १४/०२/२०२५ दिनाङ्कादारभ्य २०/०२/२०२५ दिनाङ्कं यावत् वेदव्यासपरिसरस्य सरोजिनीमहिषीमहिलाध्ययनानुसन्धानकेन्द्रेण संस्कृतग्रामनाम्ना विख्याते मसोटग्रामे सप्ताहात्मकस्य सम्भाषणशिबिरस्य आयोजनं कृतम्। अस्य अध्यक्षतां परिसरनिदेशकः प्रो. सत्यमकुमारीवर्या अकरोत्। अस्य शिबिरस्य संयोजिका डॉ. के.मनोज्ञा आसीत्। शिक्षाशास्त्रिविभागस्य प्राध्यापिका डॉ. संतोषगोदरामहोदया योगाभ्यासं कारितवती। शिक्षाशास्त्रिछात्राभ्यां शीतलासीमाभ्यां सम्भाषणशिक्षणं कृतम्।

**व्यवसायिकक्षमतोन्नयन कार्यक्रमः-** वेदव्यासपरिसरे शिक्षाशास्त्रविद्याशाखायाः छात्राणां सर्वाङ्गीणविकासदृष्ट्या व्यवसायिक-क्षमतोन्नयनकार्यक्रमः आयोजितः। यत्र शिक्षाशास्त्रिद्वितीयवर्षस्य छात्राः परस्परं विविधविषयेषु चर्चाम् अकुर्वन्। अयं कार्यक्रमः विद्याशाखायाः विभागाध्यक्षस्य डॉ. सत्यदेववर्यस्य मार्गदर्शने सम्पन्नः अभवत्।

**राजमार्गसुरक्षाविषये काव्यगोष्ठी-** ११/०२/२०२५ दिनाङ्के वेदव्यासपरिसरे राष्ट्रीयसेवायोजनायाः साहित्यविद्याशाखायाश्च संयुक्ततत्त्वावधाने राजमार्गसुरक्षाविषये काव्यगोष्ठी आयोजिता यत्र कविरूपेण परिसरस्य पूर्वच्छात्रः श्रीकरतारचन्दः उपस्थितः आसीत्। अनेन उक्तविषये स्वविचाराः कवितामाध्यमेन प्रकटिताः। कार्यक्रमेऽस्मिन् सेवायोजनायाः २०० स्वयं सेविनः उपस्थिताः आसन्।

**हैमन्तिककार्यशाला-** वेदव्यासपरिसरे २५/०२/२०२५ दिनाङ्कात् सप्ताहात्मिकायाः हैमन्तिककार्यशालायाः प्रारम्भः अभवत्। अस्यां चम्पूरामायणस्य पङ्क्तिशः अध्ययनं विधास्यते। अस्याः उद्घाटकः प्रो. रामकुमारशर्मा आसीत्। अस्याः संयोजकः प्रो. मञ्जुनाथः एस्.जि. अस्ति। सहसंयोजकौ डॉ. श्यामबाबू डॉ शक्तिशरणशर्मा च स्तः। अस्यां विविधस्थानेभ्यः ५० प्रतिभागिनः उपस्थिताः सन्ति। सर्वेऽपि नियतगत्या यानानि चालयेयुः। येन दुर्घटनाः स्वस्य परस्य वा हानिः न स्यात् इति सम्यक् उद्बोधिताः छात्राः।




**अखिलभारतीयशलाकापरीक्षा-** संस्कृतभारती-जयरामाश्रमयोश्च संयुक्ततत्वावधाने देहल्यां मार्चमासस्य प्रथम-द्वितीय दिनाङ्कयोः अखिलभारतीयशलाकास्पर्धायाः आयोजनम् अभवत्। यत्र वेदव्यासपरिसरस्य प्रियाकौण्डलः साहित्यशलाकायां तृतीयं स्थानं प्राप्तवती। एवमेव व्याकरणविभागस्य छात्रः हरीश शर्मा व्याकरणशलाकायां तृतीयं स्थानं प्राप्तवान्।

**सप्तसिन्धुसंवादः-** ०५/०३/२०२५ तः ०७/०३/२०२५ पर्यन्तं केन्द्रीयसंस्कृतविश्वविद्यालयस्य वेदव्यासपरिसरे, हि.प्र. केन्द्रीय- विश्वविद्यालयस्य च संयुक्ततत्त्वावधाने त्रिदिवसीयः सप्तसिन्धुसंवादः आयोजितः। यत्र नानाविश्वविद्यालयेभ्यः विषयविशेषज्ञाः उपस्थिताः अभूवन्। अस्य संयोजकः डॉ. योगेशपाण्डेयः आसीत्। अयं संवादः परिसरनिदेशकस्य प्रो. सत्यमकुमारीमहोदयायाः आध्यक्षे सम्पन्नः अभवत्।

**अखिलभारतीयशास्त्रीयस्पर्धा-** २१/०३/२०२५तमे दिनाङ्के हरिद्वारे आयोजितायाम् अखिलभारतीयशास्त्रीयस्पर्धायायाः परिणामः उद्घोषितः यत्र वेदव्यासपरिसरस्य त्रयः छात्राः पुरस्कारं प्राप्तवन्तः। तत्र सुश्रीः दिव्याश्रीमिश्रः धर्मशास्त्रभाषणे प्रथमं पुरस्कारं प्राप्तवती। साहित्यशलाकायां प्रीतिः द्वितीयं पुरस्कारं प्राप्तवती। एवमेव ओंकारशर्मा ज्योतिषशलाकायां तृतीयपुरस्कारेण सभाजितः। छात्राणाम् उत्तमेन प्रदर्शनेन वेदव्यासपरिसरे प्रसन्नतायाः वातावरणम् आसीत्। परिसरनिदेशकेन शुभकामनाभिः प्रशंसिताः इमे छात्राः।

**अन्ताराष्ट्रियमहिलादिवसः-** ८०/०३/२०२५ तमे दिनाङ्के वेदव्यासपरिसरे अन्ताराष्ट्रीयमहिलादिवसस्य आयोजनमभवत्। अस्मिन् अवसरे भारतीय-उच्चतमन्यायालयस्य अधिवक्ता नियतीशर्मा उपस्थिता आसीत्। अस्य अध्यक्षः परिसरनिदेशकः आसीत्। अस्मिन् परिसरस्य सर्वाः अपि छात्राः उपस्थिताः आसन्।

**राष्ट्रिया संगोष्ठी-** २३-२४ दिनाङ्कयोः वेदव्यासपरिसरे महिलाध्ययनकेन्द्रपक्षतः द्विदिवसीया राष्ट्रीयासङ्गोष्ठी आयोजिताभूत्। यत्र नानाविश्वविद्यालयेभ्यः बहव्यः विदुष्यः उपस्थिताः आसन्। यत्र मुख्यातिथिरूपेण श्रीशंकराचार्यसंस्कृतविश्वविद्यालयस्य माननीया कुलपतिः प्रो. के. के.गीताकुमारी उपस्थिता आसीत्। अस्य अध्यक्षतां परिसरनिदेशकः प्रो. सत्यमकुमारीवर्या अकरोत्। संयोजिका च डॉ. प्रतिज्ञा आर्या आसीत्।




**छात्रावासदिवसाचरणम्-** २९तमे दिनाङ्के वेदव्यासपरिसरे छात्रावासदिवसस्य आयोजनम् अभूत्। यत्र महिलापुरुषछात्रावासस्य समेऽपि छात्राः विविधस्पर्धासु प्रतिभागम् अकुर्वन्। अत्र मुख्यरूपेण शैक्षणिकस्पर्धाः, सांस्कृतिकस्पर्धाः, क्रीडास्पर्धाश्च आयोजिताः। कार्यक्रमान्ते छात्राः पुरस्कारैः पुरस्कृताः। अस्मिन् मुख्यातिथिरूपेण हि.प्र.केन्द्रीयविश्वविद्यालयस्य प्रो. शशी पूनमवर्या, हि.प्र. उच्चशिक्षाविभागतः सेवानिवृत्तश्च प्रो. करणसिंहपठानिया उपस्थितः आसीत्। अस्य अध्यक्षतां परिसरनिदेशकः प्रो. सत्यमकुमारीवर्या अकरोत्। अस्य संयोजिका श्रीमती अनुराधाशर्मा आसीत्।

**राष्ट्रीयसेवायोजना-** वेदव्यासपरिसरे राष्ट्रियसेवायोजनायाः शिक्षाशास्त्र-विद्याशाखायाश्च संयुक्ततत्त्वावधाने दशदिवसीयं विशेषशिबिरम् आयोजितम्। अस्य संयोजिका डॉ. सन्तोषगोडरा आसीत्। अस्मिन् परिसरस्वच्छता, आपदाप्रबन्धनम्, जनजागरणम्, स्वावलम्बनञ्च स्वयं सेवकेभ्यः पाठितम्। सर्वविधं मार्गदर्शनं परिसरनिदेशकस्य प्राप्तम्।



## गङ्गानाथझापरिसरः

**डिजिटल-कुम्भानुभूतिकेन्द्रम्-** महाकुम्भः २०२५ इत्यस्य शुभावसरे मेलाक्षेत्रे डिजिटल-कुम्भानुभूतिकेन्द्रस्य सामग्रीनिरीक्षणार्थं संशोधनाय च समितेः गठनं प्रयागराजमेलाप्राधिकरणेन कृतम्। गंगानाथझापरिसरस्य निदेशकस्य आचार्यललितकुमारत्रिपाठिवर्यस्य निर्देशने स्थापितसमितेः सदस्येषु प्रो. सुनीलकान्तमिश्रः, सी एम.पी. डिग्री कालेज प्रयागराजः, प्रो. उमेशप्रतापसिंहः, ई.सी.सी, प्रयागराजः, डॉ. पूर्णेन्दुमिश्रः सी.एम.पी.डिग्री कालेज, प्रयागराजः, डॉ. मीनाक्षीजोशी, इलाहाबादविश्वविद्यालयः प्रयागराजः, श्रीप्रमोदद्विवेदी, एम.एन.एन. आई.टी. प्रयागराजः, प्रो. देवदत्तसरोदे, गङ्गानाथझापरिसरः, के.सं.वि.वि., प्रयागराजः, प्रो. मनोजकुमारमिश्रः, प्रो. अपराजितामिश्रा, इत्यादीनां विदुषां शास्त्रीययोद्धहरणानां शुद्धाशुद्धविवेचनं दृश्यानुरूपं विषयोपस्थापनं इत्यादिशैक्षाणिककार्येषु महत्वपूर्णं योगदानमासीत्। केन्द्रस्यास्य समुद्घाटनं उत्तरप्रदेशस्य माननीयमुख्यमन्त्रिणां करकमलाभ्यामभूत् तदर्थं परिसरस्य प्राध्यापकः डॉ. पंकजशर्मा, श्रीअंकितमिश्रश्च कुम्भनुभूतिकेन्द्रविषये माननीयमुख्यमन्त्रिणे सर्वं ज्ञापितवान्।





**भरद्वाजजयन्तीसमारोहः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरः, आरोग्यभारतीविश्व-आयुर्वेदमिशन, प्रयागविद्वत्परिषद् इत्येतेषां संयुक्ततत्वावधाने महर्षिभरद्वाजजयन्तीसमारोहस्य समायोजनं गंगानाथझापरिसरेऽभूत्। समारोहस्यास्य मुख्यातिथिरूपेण माननीयन्यामूर्तिः सुधीरनारायणः, विशिष्टातिथिरूपेण डॉ. राजकिशोर-अग्रवालः, श्रीनागेन्द्रजायसवालश्च समागताः आसन्। अतिथीनां वाचिकस्वागतं परिसरीया आचार्या प्रो. अपराजितामिश्रा विहितवती। मुख्यातिथिना न्यायमूर्तिना सुधीरनारायणमहाशयेन उक्तं यत् आचार्यभरद्वाजः वैद्यानां वैद्यः, उत्तरभारते विज्ञातेषु प्रथमः कुलपतिरासीदिति। कार्यक्रमस्य संयोजकः प्रो. गिरीन्द्रसिंहतोमरः उक्तवान् यत् महर्षिः न केवलमायुर्वेदशास्त्रस्य अपितु विमानशास्त्रस्यापि प्रवर्तकः आसीत्। प्रयागराजस्य प्रख्यातपत्रकारेण श्रीधीरेन्द्रपाठकेण कथितं यत् महर्षिः आद्यः चिकित्सकः परमवैज्ञानिकः आसीत्। समारोहस्य विशिष्टातिथिना डॉ. राजकिशोर-अग्रवालमहाशयेन कथितं यत् महर्षि- भरद्वाजस्य स्मृतौ अस्माभिरत्र प्रयागराजे गुरुकुलस्य निर्माणं कर्तव्यमिति। तथा च गंगानाथझापरिसरे अधीयानाः छात्राः आयुर्वेदे शोधं कुर्युरिति। एवमेव डॉ. नागेन्द्रजायसवालमहाशयेन महर्षिणे बहुधा प्रणतिः समर्पिता। कार्यक्रमे समागतनां विदुषां कृते धन्यवादज्ञापनं डॉ. अवनीशपाण्डेयेमहाशयेन कृतम्। समारोहेऽस्मिन् परिसरीयप्राध्यापकाः, शोधच्छात्राः, कर्मचारिणः, नागरिकाः, पत्रकाराः, वैदिकवटवः, अन्ये च गणमान्याः समुपस्थिताः आसन्। कार्यक्रमस्यास्य आध्यक्षं परिसरीयनिदेशकेन आचार्यललितकुमारत्रिपाठिवर्येण विहितम्।

**महाकुम्भे छात्रसंगमः-** महाकुम्भमुपलक्ष्य केन्द्रीयसंस्कृतविश्वविद्यालस्य आभारते विद्यमानां विविधपरिसरीय छात्राणां दलं कुम्भदर्शनव्याजेन गंगानाथझापरिसरं सम्प्राप्तम्। अवसरेऽस्मिन् छात्राः परिसरीयं पुस्तकालयं ग्रन्थालयञ्च दर्शितवन्तः। एवञ्च चन्द्रशेखरआजादोद्याने संस्थापितां स्वतन्त्रासेनानीनां चन्द्रशेखरमहाशयानां प्रतिमां प्रति गत्वा श्रद्धाञ्जलिं दत्तवन्तः। मार्गे सर्वे संस्कृतमातरं भजन्तः जयतु संस्कृतं, जयतु भारतं इत्यस्य समुद्घोषं कृतवन्तः। यदाकर्ण्य भ्रमणार्थं उद्यानं समागताः नागरिकाः आनन्दनिमग्नाः अभूवन्। तदनन्तरं सर्वेऽपि महर्षिभरद्वाजाश्रमं गत्वा महर्षिणाम् अर्चनं पूजनञ्च कृतवन्तः। समागतानां छात्राणां शिक्षकाणाञ्च गंगानाथझापरिसरस्य निदेशकेन सार्धं सामूहिकं चित्रं स्वीकृतम्। समग्रोऽपि उपक्रमोऽयं विश्वविद्यालयस्य कुलसचिवस्य आचार्यमुरलीकृष्णवर्यस्य मुख्यातिथित्वे परिसरीयनिदेशकस्य आचार्यललितकुमारत्रिपाठिवर्यस्य आध्यक्षे सम्पादितः। अवसरेऽस्मिन् परिसरीयप्राध्यापकाः, छात्राः, कर्मचारिणश्च सानन्दं साम्मिलिताः आसन्।






**गणतन्त्रदिवसः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरे २६/०१/२०२५तमे दिनाङ्के सानन्दं गणतन्त्रदिवसः समनुष्ठितः। कार्यक्रमस्यास्य मुख्यातिथिरूपेण प्रो. भारतभूणमिश्रमहाशयः, अध्यक्षः, ज्योतिषशास्त्रविद्याशाखा, भोपालपरिसरः, समागतः आसीत् यत्र परिसरनिदेशकः आचार्यललितकुमारत्रिपाठिवर्यः आदौ ध्वजारोहणं कृतवान्। एवञ्च स्वकीयोद्बोधने भारततस्य विकासयात्रायां वयं सर्वे सहभागिनः भवेम इति सम्प्रार्थितवान्। अथ च तेन उक्तं यदयं कालः भारतस्य विकासकालो वर्तते। कार्यक्रमस्य संयोजनं डॉ. अञ्जनीपुण्डरीकः कृतवान्। अवसरेऽस्मिन् परिसरीय प्राध्यापकाः, छात्रा कर्मचारिणश्च सम्मिलिताः आसन्।

**बसन्तपञ्चमीपूजनोत्सवः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरे ०३/०२/२०२५तमे दिनाङ्के बसन्तपञ्चम्याः समायोजनं विश्वविद्यालयस्य माननीयकुलपतीनां आचार्यश्रीनिवासवरखेडीनां सदाध्यक्षे कृतम्। आदौ वैदिकवरवः वेदनारायणस्य प्रतिशाखं मन्त्रोचारणं कृतवन्तः। तदनन्तरं शास्त्रोक्तविधिना माननीयकुलपतीनां यजमानत्वे परिसरपरिवारः भगवत्याः शारदायाः पूजनं अकरोत्। तत्पश्चात् बसन्तपञ्चमीमुपलक्ष्य कुलपतीनां उद्बोधनं सञ्जातं यत्र कुलपतयः बसन्तपञ्चम्याः महत्वं प्रयागे सम्पद्यमानस्य कुम्भोत्सवस्य शास्त्रीयमहत्वञ्च प्रकाशितवन्तः। अवसरेऽस्मिन् "श्रीप्रयागक्षेत्रमाहात्म्यसारसंग्रहः"इति विश्वविद्यालयेन प्रकाशितस्य ग्रन्थस्य लोकार्पणं माननीयकुलपतीनां करकमलाभ्याम् अभूत्। समागतानामतिथीनां वाचिकस्वागतं धन्यवादज्ञापनञ्च परिसरनिदेशकेन आचार्यललितकुमारत्रिपाठिवर्येण कृतम्। कार्यक्रमस्य विशिष्टातिथयः प्रो. ब्रजभूषण ओझामहाशयेन बसन्तपञ्चम्याः महत्वं विशदीकृतम्। अवसरेऽस्मिन् कर्नाटकसंस्कृतविश्वविद्यालयस्य व्याकरणविभागस्य आचार्या प्रो. शिवानीवर्या, डॉ. श्रुतिवर्या, डॉ.स्वातिमहाभागा च समुपस्थिता आसीत्। ताः अपि स्वकीयं प्रयागभ्रमणजनितमनुभवंसमेषां समक्षं प्रस्तुतवत्यः। कार्यक्रमस्यास्य संयोजनं डॉ. पंकजशर्मणा, संचालनञ्च श्रीअङ्कितमिश्रेण कृतम्। अवसरेऽस्मिन् आभासिक माध्यमेन विश्वविद्यालयस्यप्राध्यापकाः, छात्राः, कर्मचारिणश्च समुपस्थिताः अभूवन्।



**विशिष्टव्याख्यानम्-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरे ०६/०२/२०२५तमे दिनाङ्के महर्षिः अगस्त्यस्य चिकित्सपद्धतिः इति कार्यक्रमः समायोजितः। समारोहेऽस्मिन् मुख्यतिथिरूपेण श्रीलालबहादुर-शास्त्रिराष्ट्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. रमेशकुमारपाण्डेयवर्यः समागतः। तेन उक्तवन्तं यत् महर्षिरगस्त्यतः सिद्धचिकित्सापद्धतेः जनकः इति। कार्यक्रमस्य आध्यक्षं विदधानः परिसरनिदेशकः आचार्यः ललितकुमारत्रिपाठिवर्योऽपि सिद्धचिकित्सापद्धत्तेः व्यावहारिकपक्षान् समुद्घाटितवान्। एवमेव वेदविभागाध्यक्षः प्रो. मनोजकुमारमिश्रवर्योऽपि सिद्धचिकित्सापद्धत्तेरनुद्घाटितपक्षस्समुद्घाटितवान्। समागतानामतिथीनां वाचिक- स्वागतं प्रो. देवदत्तसरोदेमहाशयेन विहितम्। सञ्चालनं श्रीअंकितमिश्रेण कृतम्। कार्यक्रमसंयोजनं धन्यवादज्ञापनञ्च श्रीराजेशकान्ततिवारिणा कृतम्। अवसरेऽस्मिन् परिसरप्राध्यापकाः, छात्राः, कर्मचारिणश्च सम्मिलिताः अभूवन्।



**परीक्षायां चर्चा-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरस्य मुख्यसभागारे १०/०२/२०२५तमे दिनाङ्के राष्ट्रस्य परीक्षार्थिनां कृते परीक्षा पर चर्चा" इत्यस्य कार्यक्रमस्य प्रसारणं विहितम्। यत्र भारतस्य माननीयप्रधानमन्त्री नरेन्द्रमोदिवर्यः छात्रान् उद्बोधितवान्। प्रधानमन्त्रिवर्यः परीक्षार्थिभिः प्रस्तुतान् प्रश्नान् निशम्य तेषां समुचितमुत्तरं दन्तवान्। यदाकर्ण्य छात्राः अतितरां संतुष्टाः अभूवन्। अथ च प्रधानमन्त्रिणा श्रीमतानरेन्द्रमोदिना तथ्यमिदं छात्राणां समक्षं समुद्घारितं यत् कथं ते अवसादमुक्ताः भविष्यन्ति। कथञ्च ते क्रीडन्तोऽपि गीतादिकं शृण्वन्तोऽपि परीक्षासिन्धुं तर्तुं समर्थाः भविष्यन्ति इति। अवसरेऽस्मिन् परिसरीयप्राध्यापकाः, छात्राः, कर्मचारिणश्च सम्मिलिताः अभूवन्। यच्छ्रुत्वा दृष्ट्वा च परिसरीयाः शोधच्छात्राः अपि दृढमानसाः अभूवन्।



**अन्तर्राष्ट्रीयमातृभाषादिवससमारोहः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य गंगानाथझापरिसरे २२/०२/२०२५ दिनाङ्के अन्तर्राष्ट्रीयमातृदिवसस्य रजतजयनत्याः शुभावसरे विशिष्टः कार्यक्रमः समायोजितः। यत्र समुपास्थिताः परिसरीयाः छात्राः, प्राध्यापकाः, कर्मचारिणश्च स्व-स्वमातृभाषायां विशिष्टां प्रस्तुतिं प्रस्तुतवन्तः। कार्यक्रमस्यास्य अध्यक्षतां कृतवता परिसरनिदेशकेण आचार्यललितकुमारत्रिपाठिना अवसरेऽस्मिन् मातृभाषायाः प्रासंगिकताविषये स्वकीयविचारः विशदीकृतः। तथा च मातृभाषायाः प्रयोगेण कथं छात्राः सरलतया सर्वमपि ज्ञानं समर्जयितुं समर्थाः भविष्यन्ति इत्यपि विवेचितम्। क्रमेऽस्मिन् परिसरीयः छात्रः बसन्तः नेपाली भाषायाः कवितां प्रस्तुतवान्। सिन्धीभाषायाः माधुर्यं प्रदर्शितम्। डॉ. पंकजशर्मणा ब्रजभाषायां प्रस्तुतिः प्रस्तुता। प्रो. देवदत्तसरोदे महाशयेन मराठी तेलगू इत्यनयोः भाषयोः वैशिष्ट्यं व्याख्यायितम्। सुश्री-अश्विनीराजेशलङ्केमहोदया मराठीभाषायां स्वकीया प्रस्तुतिं प्रस्तुतवती। एवमेव परिसरपरिवारसदस्याः स्व-स्व मातृभाषायां स्वकीयां प्रस्तुतिं प्रस्तुतवन्तः। कार्यक्रमस्यास्य संयोजन प्रो. अपराजितामिश्रा कृतवती। स्वागतञ्च श्रीराजेशकान्ततिवारिणा कृतम्।



**ई-ऑफिस कार्यशाला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरे २४/०२/२०२५तमे दिनाङ्के ई-आफिस इति विषयमधिकृत्य कार्यशाला समायोजिता। यत्र विश्वविद्यालयस्य कुलसचिवस्य आचार्यः आर.जी. मुरलीकृष्णवर्यस्य नेतृत्वे मुख्यालयतः समागताः कर्मचारिणः छात्राश्च सम्मिलिताः अभूवन्। आदौ परिसरनिदेशकः कुलसचिवस्य पुष्पगुच्छेन राङ्कवेण च स्वागतं कृतवान्। एवमेव समागतानामन्येषामपि स्वागतं निदेशकेन विहितम्। ततः परं कार्यशालायां श्री तापसभौमिकः ई-आफिस-सम्बन्धितान् सर्वान्नपि विषयान् सविशदं समेषां समक्षं प्रस्तुतवान्। येन सर्वेऽपि प्रतिभागिनः लाभान्विताः सञ्जाताः। ततः परं कुलसचिवः परिसरस्य ऐतिह्यं प्रकाशितवान्।



## जयपुरपरिसरः



**पुत्तलिकानिर्माणकार्यशाला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे जनवरिमासस्य सप्तमदिनाङ्क तः नवमदिनाङ्कम् यावत् एकीकृतशिक्षकशिक्षाविभागपक्षतः छात्राणां कृते त्रिदिवसीया पुत्तलिकानिर्माण- कार्यशाला पुत्तलिकासञ्चालनप्रशिक्षणं च भारतीयसांस्कृतिकज्ञानपरम्परायाः संरक्षणाय आयोजितम्। परम्परागतशिल्पकाराः ऋतिकपटेलः ओंकारपटेलश्च छात्रान् प्रशिक्षितवन्तः। छात्राणां कौशलविकासाय सर्वांगीणविकासाय च एतादृशाः प्रशिक्षणकार्यक्रमाः आयोजिताः। एतेन कौशलाधारितशिक्षणेनैव उत्तमाध्यापकस्य निर्माणं कर्तुं शक्यते।



**छन्दोऽलंकारप्रशिक्षणकार्यशाला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे जनवरीमासस्य सप्तविंशतिदिनाङ्कतः एकत्रिंशद्दिनाङ्कं यावत् प्राध्यापकविकासकेन्द्रपक्षतः छन्दोऽलंकारप्रशिक्षण-कार्यशालायाः आयोजनमभवत्। अत्र दशाधिकशतशिक्षकैः छन्दोऽलङ्काराणाम् प्रायोगिकं प्रशिक्षणं प्राप्तम्। अनया कार्यशालया शिक्षकेषु शिक्षणकौशलस्य विकासः सम्भवति।

**राज्यस्तरीयस्पर्धा-** केन्द्रीयसंस्कृतविद्यालयस्य जयपुरपरिसरे सप्तमाष्टमदिनाङ्कयोः राज्यस्तरीयचयनस्पर्धानामायोजनमभवत्। पञ्चविंशतिस्पर्धासु स्पर्धालवः उत्कृष्टं प्रदर्शनं कृत्वा राष्ट्रीयस्तरीयस्पर्धायाः कृते स्थानं रक्षितवन्तः। एल.बी.एस तः प्रो. विष्णुपदमहापात्रवर्यः, जे.एन.यू. तः प्रो. प्रमोदकुमारशर्मा नासिक तः डॉ. कार्तिक भागवतः, ज.रा.रा.सं.वि.वि, जयपुरतः प्रो. राजधरमिश्रप्रभृतयः समवेताऽभवन्। अनया स्पर्धया छात्राणामुत्साहः वर्धितः। अनेन स्वस्थशरीरमस्तिष्कविकासात् बौद्धिकविकासोऽपि अभवत्।



**महाकुम्भयात्रा-** महाकुम्भे प्रयागराजे जयपुरपरिसरस्य छात्राः मार्गदर्शकाः कर्मचारिणश्च षोडश-दिनाङ्कतः एकोनविंशतिः दिनाङ्कं यावत् अमृतस्थानं कृत्वा चतुर्दिनानि केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रतिनिधिरूपेण विश्वविद्यालयस्य गौरवं प्रसारितवन्तः। महाकुम्भयात्रया छात्रेषु सनातनसंस्कृतेः भारतीयसभ्यतायाश्च भावना वर्धिता। शैक्षिकभ्रमणात् छात्रेषु आध्यात्मिकचेतनायाः वृद्धिः जाता।

**व्याख्यानमाला-** जयपुरपरिसरस्य वेदपौरोहित्यकर्मकाण्डविद्याशाखया २५/०२/२०२५ दिनाङ्के "कर्मकाण्ड-डिप्लोमा-पाठ्यक्रमस्य मुख्यांशानां व्याख्यानमाला" समायोजिता। अस्मिन् कार्यक्रमे मुख्यवक्त्रीरूपेण समुपस्थिता आसीत् जयपुरपरिसरस्य पूर्वनिदेशिका प्रो.भगवतीसुदेशशर्मवर्या, तथा च विशिष्टातिथिरूपेण समुपस्थितः आसीत् वेदविद्याशाखाध्यक्षः प्रो. मनोजकुमारमिश्रमहोदयः। संस्कारविषयमाश्रित्य मिश्रमहोदयेन अद्यतन समाजे संस्काराणाम् उपयोगिता, संस्काराणां भेदाः, कथं तेषां प्रयोगः कर्तव्यः इति बोधितम्।

**कार्यशाला-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य राजस्थानप्रदेशस्थ जयपुरपरिसरे २५/०२/२०२५तमे दिनाङ्के राजभाषाकार्यान्वयनसमितिः हिन्दीविभागः तथा च आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठद्वारा आयोजिता एकदिवसीया कार्यशाला। "राजभाषानीतिः तस्याः कार्यान्वयनम्" च कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण विषयविशेषज्ञरूपेण च श्रीजगदीशरामपौरीवर्यः निदेशकः, राजभाषा, शिक्षामन्त्रालयः भारतसर्वकारः, श्री मुकेशगातेवर्यः वरिष्ठानुवाद-अधिकारी, राजभाषा शिक्षामन्त्रालयः भारतसर्वकारः आसीत्।



**शिक्षाशास्त्रानुसन्धाननवाचारकार्यशाला-** शिक्षाशास्त्रे अनुसन्धानक्षेत्रे च नवाचारान् आनेतुं १९/०२/२५ तः २१/०२/२०२५ पर्यन्तम् त्रिदिवसीयाकार्यशालायाः आयोजनम् अभवत्। अस्यां कार्यशालायां मुख्यातिथिरूपेण चान्द्किरणसलूजावर्यः तथा च आचार्यमदनमोहनझावर्यः, आचार्यसोहनलालपाण्डेयवर्यः, आचार्यगोपीनाथशर्मवर्यः, श्री लक्ष्मीनरसिंहवर्यः, प्रो.नीलाभतिवारीवर्यः, प्रो.शीशरामवर्यः, प्रो. गणेशतिम्मण्णपण्डितवर्यः, डा. पुरुषोत्तमवर्यः, डा. बलरामवर्यः इत्यादयः उपस्थिताः आसन्। भाव्यनुसन्धातारः कीदृशेषु विषयेषु क्षेत्रेषु च शोधकार्यं कुर्युः। तेषां मार्ग-दर्शकाणां विषयेऽस्मिन् अभिप्रायाः के? विषयविशेषज्ञानां परामर्शाः के? संस्कृतशिक्षाशास्त्रक्षेत्रे आदर्शशोधप्रारूपाणि कानि? कथं विद्याशाखायां प्रयोक्तव्यानि इत्यादिषु विषयेषु गभीराः संवादाः समभवन्।



**योगकार्यक्रमः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे मङ्गलवासरे ४ फरवरी, २०२५ दिनाङ्के योगजगतः अभूतपूर्वकार्यक्रमः सञ्जातः। यस्मिन् चतुश्शतादप्यधिकाः योगसाधकाः समूहेन सततं च अष्टाधिकशतवारं सूर्यनमस्कारं कृतवन्तः। कार्यक्रमे समुपस्थिताः राजस्थानप्रदेशस्य महामहिमराज्यपालाः श्रीहरिभाऊबागडेमान्यवराः स्वकीयगरिमामयोपस्थितेः योगसाधकानामुत्साहमभिवृद्धवन्तः। महोदयैः उक्तं यत् योगविषये जनमानसानां सक्रियत्वाय जागृतत्त्वाय च ते परमावश्यकाः सन्ति अतः ईदृशाः कार्यक्रमाः राष्ट्रोत्थानाय महत्त्वपूर्णभूमिकां वहन्ति। कार्यक्रमे राष्ट्रियस्वयंसेवकसंघस्य क्षेत्रप्रचारकः श्रीनिम्बाराममहोदयः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य निदेशकः आचार्यः सुदेशकुमारशर्ममहोदयः, सहनिदेशकः आचार्यः वाय.एस.रमेशवर्यः, क्रीडाभारत्याः अखिलभारतीयाध्यक्षः श्रीगोपालसैनीवर्यः,, जयपुरप्रान्तीयाध्यक्षः डॉ.जी.एल.शर्ममहोदयः, पैरा-ओलिंपियनशूटर इत्यस्य अवनीलेखरामहोदयानां माता श्रीमतीश्वेताजेवरियाइमहोदया च उपस्थिता आसीत्।



**योग-विश्व-रिकार्ड-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य छात्रैः फरवरीमासस्य २१ तमे दिनाङ्के रचितः इतिहासः। पञ्चत्रिंशत् छात्रैः १६११ निमेषेषु सततं योगप्रदर्शनं कृत्वा विश्व-रिकॉर्ड साधितः । अनेन प्राप्तोत्कर्षेण विश्वविद्यालयस्य माननीयः कुलपतयः प्रो. श्रीनिवासवरखेडीवर्यः सर्वेभ्यः शुभाषीः प्रायच्छत्। संस्कृतवार्ता पक्षतः अपि सर्वेभ्यः हार्दिक्यः शुभकामनाः।

**राष्ट्रियसेवायोजना-** राष्ट्रियसेवायोजनायाः छात्राणां कृते २२ तः २८ मार्च पर्यन्तं सप्तदिवसीय शिविरस्यायोजनम् कृतम्। कार्यक्रमेऽस्मिन् राष्ट्रियसेवायोजनायाः निदेशकः प्रो. एस.पी. भटनागरमहोदयः छात्रान् उद्बोधितवान्। अनेन शिविरेण छात्राः स्वच्छतायाः कृते प्रायोगिकरूपेण शिक्षिताः। इतोपि जागरूकतारैली, वनस्पतीनां संरक्षणं, राष्ट्रप्रेम एवञ्च राष्ट्रसेवाप्रभृतिविषयेषु छात्राः प्रशिक्षणं प्राप्तवन्तः।

**प्रशिक्षणकार्यक्रमः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य शिक्षाशास्त्रविद्याशाखया राजस्थानराज्यभारतस्काउट-गाइडसंस्था जयपुरद्वारा बनीपार्क प्रशिक्षण केन्द्रे तथा रोपाडा गोनेरमोड प्रशिक्षणकेन्द्रे ०३/०३/२०२५ तः ०९/०३/२०२५ दिनाङ्क पर्यन्तं बालचरसङ्घप्रशिक्षणकार्यक्रम: (स्काउट एवं गाइड शिबिरम्) आयोजित:। श्रीशरदकुमारशर्मा, मुरारीलालशर्मा, ललितप्रजापतिः, सुशीला-उपाध्यायः, तनुजाशर्मा, डॉ.मधुराठौडः, जयश्रीताम्बी इत्यादयः छात्रेभ्यः प्रशिक्षणं दतवन्त:। स्काउटगाइड शिबिरे ६६ छात्राध्यापिकाः तथा ३८ छात्राध्यापकाः आहत्य १०४ छात्रा: भागं गृहीत्वा विभिन्नजीवनकौशलानाम् यथा-प्रार्थना, ध्वजारोहणं, अभ्यासः, सैद्धान्तिककक्षा, स्वच्छता, केम्पफायर आदि अनुभवं प्रशिक्षणं च प्राप्तवन्तः।



**प्रशिक्षणकार्यक्रमः-** षड्दिवसीय संस्कृत प्रौद्योगिकी अल्पावधिप्रशिक्षणकार्यक्रमः २० दिनाङ्कतः २५ दिनाङ्क पर्यन्तं प्राध्यापकविकासकेन्द्रेणसंचालितः।



विशिष्टातिथिः श्रीतरूणशर्मा ए.आई. ट्रेनर सम्भवफाउण्डेशन मुख्यातिथिश्च श्रीश्रीनिवास-जम्मलडकमहोदयः आसीत्। उद्घाटनसत्रे एफ.डी.सी. निदेशकः प्रो. वाई.एस.रमेशवर्यः तथा च आई.क्यू.ए.सी. निदेशकः प्रो. ईश्वरभट्टमहोदयः छात्रान् प्रोत्साहितवान्। कार्यक्रमेऽस्मिन् प्रतिभागिनः कृत्रिमबुद्धिमत्ता (AI) टूल्स, मुक्तशैक्षिक- संसाधनम् (OER), ऑनलाईन पाठ्यक्रमः (Moocs) ई-लर्निंग, पीपीटी-निर्माणम्, वीडियो-ऑडियोसम्पादनम्, संस्कृतगेमिफिकेशन, सरलसंस्कृतभाषाप्रदर्शिनी, संस्कृतमोबाईलएप्सप्रभृतिविषयेषु ज्ञानं प्राप्तवन्तः।

**अखिल-भारतीयशास्त्रोत्सवः-** केन्द्रीयसंस्कृतविश्वविद्यालयस्य ऐषमः ६२तमः अखिल-भारतीय- शास्त्रोत्सवः हरिद्वारे पतञ्जलीयोगपीठे योगर्षीणां श्रीरामदेवगुरूणां सन्निधौ पतञ्जलीविश्वविद्यालये दिनाङ्कः १८/०३/२०२५ तः २१/०३/२०२५ पर्यन्तम् समायोजितम्। अस्मिन् जयपुरपरिसरस्य १७ प्रतिभागिनः विभिन्नप्रतियोगितासु भागमग्रहीत्। द्वौ छात्रौ स्वर्णपदकं तिस्रः रजतपदकम् एकं च कांस्यपदम् प्राप्तवान्।







**नाट्यलेखनकार्यशाला-** जयपुरपरिसरे दिनांक २३/०३/२०२५ तः २७/०३/२०२५ पर्यन्तं प्राध्यापकविकासकेन्द्रद्वारा पञ्चदिवसीय नाट्यलेखनकार्यशाला आयोजिता। अस्यां कार्यशालायां प्रो. रामकुमारशर्मा, प्रो. रमाकान्तपाण्डेयः, प्रो. सूर्यमणिरथः, प्रो. रामलखनपाण्डेयप्रभृतिविद्वांसः उपस्थिताः अभूवन्। छात्रैः रचनाधर्मितासम्पादनाय प्रशिक्षणं प्राप्तम्। प्रतिभागिभिः पंचदिवसेषु पंचदशलघुनाटकानि रचितानि।

# शिक्षकोपलब्धिः



२६/०१/२०२५ दिनाङ्के गणतन्त्रदिवसवसरे उत्तरप्रदेशस्य राजभवने विशेषालङ्कारसमारोहः समनुष्ठितः। साहित्यम्, संस्कृतिः, कला, क्रीडा इत्यादिक्षेत्रेषु विशिष्टं कार्यं कृतवद्भ्यः अलङ्करणमिदं प्रदीयते। कार्यक्रमे उत्तरप्रदेशराज्यपालया आनन्दीबेनपटेलवर्यया डॉ. प्रफुल्लगडपावर्याय सम्माननमिदं प्रदत्तम्।



२३/०१/२०२५तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य लखनऊपरिसरस्य आचार्येभ्यः प्रो. भारतभूषणत्रिपाठिवर्येभ्यः तदीयं संस्कृतभाषायां योगदानं निभाल्य "कालिदासरंगभारतीसम्मानः" प्रदत्तः। उत्तरप्रदेशस्य ७४तमीं वर्षग्रन्थिमुपलक्ष्य रंगभारती द्वारा उत्तरप्रदेशनागरिकपरिषदः सहयोगेन उत्तरप्रदेशस्थापनादिवससमारोहेऽयं सम्मानः प्रदत्तः। इदं च विश्वविद्यालयस्यैव गौरवमित्यतः परिसरनिदेशकप्रभृतयः त्रिपाठिवर्यान् वर्धापनवचोभिः व्यभूषयन्।



जयपुरिसरस्य संगणकविभागीया सहायकाचार्या डॉ. नमितामित्तलमहोदया वाराणस्यां अखिलभारतीयविद्वत्परिषदः आयोजिते विद्वद्दलंकरणसमारोहे विद्वद्भूषणसम्मानेन सभाजिता।



फरवरीमासस्य २१तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य योगस्य आचार्यैः रचितः इतिहासः। डॉ. नवनीतकुमारः राज्यपालमहोदयैः सम्मानिताः।

# छात्रोपलब्धिवीथिका

केन्द्रीयसंस्कृतविश्वविद्यालयस्य अखिलभारते विद्यमानानां विविधपरिसरीयछात्राणां कृते विश्वविद्यालयपरिवारपक्षतः, संस्कृतवार्तापक्षतः च हार्दिक्यः शुभकामनाः।

गुरुवायूरपरिसरस्य योगः तथा आयुर्वेद डिप्लोमा कार्यक्रमस्य छात्रः विश्वनाथः केरलसर्वकारस्य सांस्कृतिकविभागद्वारा युवकलाकाराणां कृते दीयमानं वज्र जयन्ती पुरस्कारं प्राप्तवान्।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे अखिलभारतीयरूपकमहोत्सवे वेदव्यासपरिसरस्य छात्रः साहिलशर्मा सर्वोत्तमनटपुरस्कारेण पुरस्कृतः।



केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरस्य ज्योतिषशास्त्रविद्याशाखायाः त्रयः छात्राः भारतीयसेनायां धर्मगुरु-धर्मशिक्षकपदे चिताः।



मृत्युञ्जयशास्त्री



आशीषकुमारशर्मा



अंकितकुमारशर्मा

केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालये कार्यनिरतः डा. रविशङ्करद्विवेदीवर्यः MPPCS परीक्षामुत्तीर्य सहायकाचार्य पदनिमित्तं चितः।





मुख्यालयस्थ शोधच्छात्रः श्रीचन्द्रमोहन-नौटियालः देहलीसर्वकारस्य DSSSB परीक्षामुत्तीर्य विद्यालये शिक्षकाभिवृत्तिं प्राप्तवान्।

